कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

८०

प्रायश्चित्तेंदुशेखर

4592

K K S U LIBRARY
RAMTEK
441 106
M-872
Dist Nagpur

Accession No:- ~~4592~~ M872
Title:- प्रायश्चित्तेन्दुशेखर.
Author:- नागोजिभट्ट.
Subject:- धर्मशास्त्र
पत्र - 88.

Checked 2012
Checked 2012

॥श्रीगणेशायनमः॥ श्रीहयग्रीवायनमः॥ ॥अथ यथाविध्यनुष्ठा
नादुपचितमशुभनाशकमेव तत्प्रायश्चित्तं॥ तुल्यपुरुषार्थावतिव्याप्तिवा
रणायेवेति न तु फलांतरजनकमित्यर्थः॥ पापनिवर्तनक्षमधर्मविशेषयोग
रूढोयं शब्दः इति तु तत्त्वम्॥ संकेतविशेषसंबंधेन प्रायश्चित्तशब्दवत्त्वमेव तत्त्वमु
अत एवक्तं गम्भ्रेष प्रायश्चित्तेन घ्नेरहा इत्यन्ये पापिनः प्रायश्चित्तं नित्यने
मित्तिकं चेत्यतो विकलांगादावपि पापस्यांशो नो किं तत्प्यस्यैव न तु समग्रस्य॥
एवं च काम्यमप्येतत्॥ एवं च प्रधाननिष्पत्तावंगानिष्पत्तावपि न प्रधाननाश
इति बोध्यं॥ एकप्रायश्चित्तनाश्यनानाकर्मणां तत्प्रायश्चित्तैकप्रयोगेणैव नाशः
एवमधिकपापनाशनार्थमुक्तेनैकवारमनुष्ठितेन न्यूननाश्यस्यापि पापांतरस्य सः
एवं यत्र यत्प्रायश्चित्तमुपदिष्टं तदन्यूनत्वेनैकशक प्रायश्चित्तांतरमपि तत्र योज्यं॥
पापिनां तदुपदेशश्च पुण्याय॥ सच्चार्चितेन पृष्टेनैव विदुषा संसदि धर्मशास्त्रादि
सम्यक् बुध्वैव कार्यो न्यथोपदेष्टा प्रत्यवैति॥ संसच्चतुर्भिस्त्रिभिर्वा धर्मशास्त्रादि
तत्त्वज्ञैर्भवति॥ एकेनापि ब्रह्मविदाथ तिवर्जम्॥ सेकसहस्राद्येकपर्यंतामित्येके॥

पर्षद्दक्षिणा च लक्षगवादि किं विदेयम् ॥ यथायोग्यं कृच्छ्रसंख्यया वा पर्षत्तुष्टिर्वा गौर्वृषभश्चेत्यन्ये ॥ निवेदितदोषस्य पर्षदनुमत्यैव प्रायश्चित्तानुष्ठानं बोध्यं ॥ पापी च सचेलं स्नातो वाग्यत उपदेष्टारं साष्टांगं प्रणिपत्य स्पष्टाभिधानं वदेदिदं पापं मे निष्पन्नं प्रायश्चित्तं मे उपदिशं ॥ त्विति ॥ ततः प्रायश्चित्तमादाय पुनः स्नात्वा व्रतं चरेत् ॥ पर्षन्मतं विना कुर्वन् द्विगुणं चरेत् ॥ पापं कृत्वेतः परैर्ज्ञातदोषस्य च सभोपस्थानं विना भोजने भाषणे च पापवृद्धिः ॥ आसंवत्सरं प्रायश्चित्तकरणे तु द्वैगुण्यम् ॥ आर्तस्य प्रायश्चित्ताकथनेऽर्थितस्य विपश्चितस्तत्पापभागिता ऽज्ञात्वा कथने च ॥ शूद्रे तु प्रायश्चित्तोपदेशो विप्रमंतरा कृत्वा कार्यः क्षत्रियवैश्ययोरप्येवं ॥ गुरुणि पापे लघु लघुनि गुरु च प्रायश्चित्तं न वाच्यम् ॥ पापगौरवं च कामतः सप्रत्ययं साभ्यासमनुष्ठानादेः गौरवात् सातिशयाघनिंदार्थवादाल्लोकगर्हातिशयाच्च ज्ञातव्यं ॥ लघुताप्येतद्विपर्ययेण ज्ञेया ॥ प्रायश्चित्तं यथोक्तमेव वाच्यं न तु स्नेहलोभादिनाऽनुग्रहः कार्यः ॥ तथा हि पापं वक्तरि संक्रमेत् ॥ दुर्बले तु प्रष्टरि प्रथमतो यथोक्तमुदाहृत्य तदिच्छानुसारेण ग्रीष्मादिकालहिमालयादिदेशानुसारेण चानुग्रहः

कार्यएवाशीत्सु वृद्ध स्त्रीरोगिणामपि ।। सोपियद्वर्णस्ययत्पापे यत्प्रायश्चित्तमुक्तं
तस्मादन्यूनमर्धपादं वेतिबलदेशकालाद्यनुसारेणनततोन्यूनः ।। तत्रबालवृद्ध
स्त्रीणामर्धं ।। एकस्यहित्रिधर्मवत्वेपादमेव ।। एवंचयत्रपादमेवप्रायश्चित्तमु
पदिष्टंतत्रापिनानुग्रहः ।। षोडशवर्षन्यूनोबालः ।। अशीतिवर्षाधिकोवृद्धः ।।
पूर्णषोडशस्यपूर्णं ।। ऊनैकादशवर्षस्यपंचवर्षादूर्ध्वंपादप्रायश्चित्तम् ।। ततआ
षोडशमर्धं ।। तदपितत्पित्रादिभिः कार्यंहुवमतिरोग्यतिवृद्धयोरपिपुत्रादिभिः ।।
पंचवर्षन्यूनस्यनपापं ।। शास्त्रोपदिष्टंपूर्णंप्रायश्चित्तंविप्रस्यैव ।। क्षत्रियविट्शू
द्राणांतुपादपादहानिः ।। कश्चिद्विशेषस्तुवाचनिकः ।। तत्रजपहोमादिरहितंकृ
छ्रादिकमेवशूद्रस्यामंत्रकप्राणायामाश्च ।। यागाद्यनुष्ठानशीलानांजपादिकामि
तरेषांतपआदि ।। नामधारकमूर्खनिर्धनानांतपोनधीतानांच ।। षोडशवर्षाधिक
ब्रह्मचारिणोद्विगुणम् ।। वानप्रस्थस्यत्रिगुणं ।। यतेश्चतुर्गुणमितिबोध्यं ।। स्वयम
शक्तौचप्रतिनिधिद्वाराप्रायश्चित्तंकार्यम् ।। अज्ञानाकामकृतेयदुक्तंज्ञानकामकृ
तेतद्विगुणं ।। कामतोभ्यासेचतुर्गुणं ।। कामादिकृतेयदुक्तमकामादिकृतेतदर्धयोज्यं

न

कृतप्रायश्चित्तो गवां स्वयं तृणं दद्यात्॥ तच्चेत्ताः निःशंकं स्वयमेव भक्षयेयुः॥ तदैनमंगीकुर्युः॥ स चेदं पापं न पुनः करिष्यामीति प्रतिजानीयात् नो चेल्लुनः प्रायश्चित्ते नियोज्यः॥ तत्र पापानि॥ हिताकरण निषिद्धकरणेंद्रियानिग्रहेभ्यो भवंति॥ ॥+ प्रकीर्णक जातिभ्रंशकर संकरीकरणापात्रीकरण मलिनीकरणोपपातक माहापातकानुपातकरूणाणि वि+॥ ॥ तत्र जातिभ्रंशकरादिगणितातिरिक्तं प्रकीर्णम्॥ विप्रपीडाकरण मनाघ्रेय मद्यलशुनादिघ्राणं मित्रकौटिल्यं पुंसि मैथुनमेतानि जातिभ्रंशकराणि॥ खराश्वोष्ट्रमृगहस्तिजाविमीनाहिमहिषाणामन्येषां च ग्राम्यारण्यपशूनां वधः संकरीकरणानि॥ निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेवा कुसीदजीवनमसभ्यभाषणमेतान्यपात्रीकरणानि॥ बहुविद्कृमिकीटयोर्जलस्थलजंतूनां च हत्या मद्यानुगतभोजनं बहुफलैधः पुष्पस्तेयमधैर्यमेतानि मलिनीकरणानि॥ गोवधः व्रात्यतास्तेयं॥ ॥ऋणानपक्रिया॥ ॥अनाहिताग्निता॥ ॥अपण्यविक्रयः परिवेदनं॥ ॥भृतकाध्ययनं॥ ॥भृतकाध्यापनं॥ पारदार्यं॥ पारिवित्त्यं॥ ॥वार्धुष्यं॥ लवणक्रिया॥ ॥स्त्रीशूद्रविट्क्षत्रवधः॥ ॥अस

ष्कद्रुमछेदनं ॥ निंदितार्थोपजीवनं ॥ नास्तिक्यं ॥ व्रतलोपः ॥ मिथ्याभिशंसनं
सुतविक्रयः ॥ धान्यकुप्यपशुस्तेयम् ॥ अयाज्ययाजनं ॥ पितृमातृसुतत्या
गः ॥ तडागारामविक्रयः ॥ कंन्यादूषणम् ॥ परिवेदकयाजनं ॥ तस्यकंन्याप्रदा
नं ॥ अगुरोः कौटिल्यम् ॥ आत्मार्थपाकादिक्रियाद्यारंभः ॥ मद्यपस्त्रीनिषेव
णं ॥ स्वाध्यायाग्निसुतानां त्यागः ॥ बांधवस्य च ॥ स्त्रीहिंस्रौषधिजीवनं ॥ हिंस्र
यंत्रप्रवर्तनं ॥ व्यसनं द्यूतादि ॥ आत्मविक्रयः ॥ शूद्रप्रेष्यता ॥ हीनसख्यं
हीनयोनिषेवणं ॥ अनाश्रमवासः ॥ परान्नपरिपुष्टता ॥ आसच्छास्त्रा
धिगमनं ॥ सर्वाकराधिकारः ॥ भार्याविक्रयः ॥ निंदितान्नादनं ॥ अभिचारः ॥
नठादिकर्मकरण ॥ भार्यात्यागः ॥ एतान्युपपातकानि ॥ ब्रह्महत्यासुरा
पानं विप्रस्वर्णस्तेयं गुरुतल्पगमनमद्धमेतच्चतुष्टयान्यतमसंसर्ग इति
महापातकानि ॥ शूद्रस्य मद्यपाने रछाने ब्राह्मणीगमने ॥ महापातकसदृशा
नि ॥ अनुपातकानि ॥ यागस्थक्षत्रियवैश्यवधः शरणागतवधः ॥ रजस्व
लागर्भिण्यत्रिगोत्रस्त्रीणां वधः ॥ अविज्ञातगर्भस्य च ॥ सुहृदस्वे ॥ गरुवि

षये मिथ्याभिशंसनं॥ क्रोधोत्पादनमधिक्षेपोऽसत्कृत्याऽलीकनिर्बंधश्च
राजगामी पैशुनं॥ गुरोर्महाद्वेषः नास्तिक्याद्वेदनिंदा॥ कुशास्त्राध्ययनेन
वितंडावादेन चाधीतवेदानां नाशनमिति॥ ब्रह्मवधसमानि॥ लशुनवृंताह
छत्राकग्रामकुक्कुटपलांडुगृंजनादीनां मत्याभक्षणं॥ विप्रव्यतिरिक्तमित्रव
धः॥ गुरुविषये मिथ्याभिशंसनेनान्यवादित्वमन्यकर्तृकत्वं कौटिल्यम्॥
वाङ्मनःकर्मणामनार्जवरूपं जेह्म्यं॥ आत्मोत्कर्षार्थं राजकुलादावनृतभाष
णं॥ रजस्वलामुखचुंबनं कूटसाक्ष्यं वेदत्यागो वेदनिंदा तत्कर्तुरन्नभुक्तिरि
ति सुरापानसमानानि॥ विप्रसंबंध्यश्वरत्नमनुष्यस्त्रीभूधेनुहरणं निक्षेप
हरणं वार्धीकस्तुवर्णमानादि ति स्वर्णस्तेयसमम्॥ दुहितृस्नुषाभगिनीसगोत्रा
चांडालीसभार्योत्तमजातिकन्यासु रेतःसेकः पितृष्वसृमातृष्वस्रोस्तत्कन्यायो
श्च तत्र दुहितृस्नुषाभगिनीष्वकामासु॥ आचार्यपत्नीत[illegible]नयांश्वश्रूपितृव्य
भ्रातृमातुलमातामहश्रोत्रियर्त्विगुपाध्यायमित्रशिष्यस्त्रियस्तत्कन्या उदक्या
निक्षित्यो प्रव्रजितां व्रतस्थामुत्तमब्राह्मणीं सगोत्रां शरणागतां मातृसखीं राज

सापत्नीं सापत्नभगिनीं

पत्नीं स्तनधात्रीं सखीं च गच्छन्योत्रीं दौहित्रीं पतिव्रतां पितृसखीं भ्रातृभगिन्योस्सखीं कुमारीमंत्यजां म्लेंछीं पुल्कसीं योगच्छेन्नच तद्धस्स धः पतति॥ पितृव्यभ्रात्रोरुपनेत्रोरेवस्त्रीष्विति॥ गुरुतल्पगमनसममंग तथापितृमातृयोनिसंबद्धागस्तेन नास्तिकनिंदितकर्मत्यागर्भनिंदितकर्मत्यागिपतितात्याग्यपातितत्यागिनः पतिताः पातकसंयोजकाश्चेत्यनुपातकानि॥ मातृगमनं दुहितृगमनं स्वसृस्नुषयोर्गमनमित्यतिपातका॥ नीतिगोऽनिबंधेषु॥ पापिनश्चपंचधा॥ साक्षात्कर्तृअनुग्राहकप्रयोजकानुमन्तृनिमित्तकर्तृभेदात्॥ साक्षात्कर्तुः रक्षणादिनोपकारकोऽनुग्राहकः॥ आज्ञापयिताऽभ्यर्थ[illegible]मितो पदेष्टा च प्रयोजकः॥ स्वार्थं परार्थं वानुमतिकर्ताऽनुमंता॥ अनिमित्तभर्त्सनताडनार्थहरणादिनाकोपंजनयन्निमित्तकर्ता एषुउत्तरोत्तरमल्पदोषत्वं प्रायश्चित्ताल्पत्वं च बोध्यम्॥ पापिनो प्रायश्चित्ततो न्मुखत्वाय जन्मांतरभाविनः कर्मविपाकाः कतिचिदुच्यंते॥ अज्ञानतो ब्रह्महा मृगश्वरसूकरोष्ट्राणां क्रमेण योनिमेति॥ सुरापः खरपुक्कसवेनानाम्॥ स्वर्णस्तेयी विज्ञातक्रमिकीटपतंगत्वं क्रमाद्याति॥ गुरुतल्पगस्तृणगुल्मलतात्वं क्रमाद्याति ज्ञानतो ब्रह्महा श्वशूकरखरोष्ट्रगोजाविमृगपक्षिचंडालपुक्कसानां योनिमेति॥

सुरापो विट्कृमिकीटपतंगपक्षिहिंस्राणां च योनिमेति ॥ सुवर्णस्तेयो उर्णनाभ
कृकलासतिरश्चां पशुपक्ष्यादीनां चाम्बुमरिणां च हिंस्राणां पिशाचानां च सहस्रश
स्तयाति ॥ गुरुतल्पगस्तृणगुल्मलतानां क्रव्यादानां क्रूरकर्मणां च ॥ ततो योगी
चतहतः ॥ ततो मनुष्यजन्मनि ब्रह्महा क्षयी ॥ सुरापः श्यावदंतकः ॥ सुवर्णस्तेयी कुन
खी ॥ तुर्यः कुष्ठी ॥ पंचमस्तद्धत ॥ परस्त्रीव्यवहारी निर्जलारण्ये ब्रह्मराक्षसः ॥ अ
नध्यायी दुःप्रतिग्राही च ॥ अन्नेरले हरन्न जीर्णव्याधिरतिदरिद्री वा ॥ ज्ञानवा
ग्वेदपुस्तकानां चोरो मूकः ॥ पत्रशौकयोर्मयूरः ॥ हेमरत्नानां हैमकारी पक्षी ॥ अ
तिदरिद्री वा ॥ न्यासस्यानपह्नोऽपधनश्च ॥ सुगंधानां छुछुंदरी धान्यानां मूषकः ॥
तिलानां तैलपायिकीटः ॥ परद्रव्यभाना तीर्यकाः ॥ अहुतं हविरश्नन्हरन्वोपर्याति
दुःखी च ॥ यानं हरन्नुष्ट्रः ॥ फलं कपिः ॥ जलं जलप्लवः ॥ पतंगः ॥ पक्षी मत्स्यो वा ॥
क्षीरं काकोबलाको वा ॥ गृहोपस्करं गृहोपकारी कीटः मधु दंशः कीटो वा ॥ मांसं
गृध्रः ॥ गां गोधा सर्पो वा ॥ अग्निं बकः ॥ वस्त्रं कुष्ठी पतंगो वा रसं श्वा लवणं चीरी
कीटः ॥ तैजसं मंडली ॥ गोदेवब्राह्मणस्वं पांडुरोगी ॥ न्यासं काणोऽनपत्यो वा ॥ श
य्यां क्षपणकः ॥ शंखं शुक्तिं वा कपाली ॥ दीपं कौशिकः ॥ स्नेहं क्षयी ॥ परं परप्रेष्यः ॥

यद्यद्धरति तत्तत्प्रकारः प्राणी तत्तद्विकलो वा भवति॥ ब्राह्मणीगो निर्बीजी॥ मात
रं स्नुषां वा गछन्नूवानवेषणः॥ चांडालीं पुल्कसीं वाऽजगरः प्रव्रजितां मरुपिशाचः॥
शूद्रीं दीर्घकीटः॥ सवर्णां दीर्घकीटः॥ राजस्त्रियं नपुंसकः॥ गां गछन्मंडुकः पिशुनो
दुर्गंधनासिकः॥ सूचको दुर्गंधास्यः॥ देवब्राह्मणाक्रोशकः खल्वतिः॥ गरदा
ग्निदा उन्मत्तो॥ गुरुंप्रतिहंतापस्मारी॥ गोघ्नोंऽधः॥ धर्मपत्नीं त्यक्त्वान्यत्र प्रव
लः शब्दवेधी प्राणी॥ कुंडाशी भगभक्षकः॥ स्त्रीपण्यजीवी षंढः॥ कौमारदा
रत्यागी दुर्भगः॥ मिष्टकाशी वा नरो वातगुल्मी च॥ अभक्ष्यभक्षो गंडमाली
क्रूरकर्मासिभः मित्रध्रुक्क्षयी॥ मातापित्रोराक्रोशी शौंडिकोनृतवाक्खल
द्वीः॥ कूटसाक्षी उत्सन्न जंघाचरणः॥ विवाहविघ्नकर्त्ता छिन्नोष्ठः॥ विप्राव
गोरणो छिन्नहस्तः॥ चतुष्पथे विण्मूत्रोत्सर्गी मूत्रकृच्छ्री॥ कन्यादूषकः षंढः
ईर्षालुर्मशकः॥ पित्रा विवदमानोपस्मारी॥ विद्याविक्रयी पुरुषमृगः॥ वेदविक्र
यी द्वीपी॥ बहुयाचको जलप्लवः॥ अयाज्ययाजको वराहः॥ अनिमंत्रितभोजी
वायसः॥ इतस्ततोऽश्नन्मार्जारः॥ कक्षवनदाही खद्योतः॥ दारकाचार्यो मुखदुर्ग
धः॥ पर्युषिताशी कृमिः॥ अदत्तादायी बलीवर्दः॥ मत्सरी भ्रमरः॥ अग्न्युत्सा

दीमंडलकुष्ठी ॥ शूद्राचार्यः ॥ श्वपाकः वार्धुष्यिकोंगहीनः ॥ अपण्यविक्रयीगृध्रः
राजाक्रोशकोगर्दभः ॥ अनध्यायाध्यायीसृगालः ॥ मत्स्यवधीगर्भवासी ॥ अ
चार्यभार्याभिगंदरी ॥ भृतकाध्यापकोर्शरोगी तीर्थमूत्राद्युत्सर्जकश्चैयंत्रविल न्य
रः ॥ अथवक्ष्यमाणप्रायश्चित्तरूपव्रते कृच्छ्रादिनिर्णयः ॥ दिवाविलंघ्यसार्ध
प्रहराभ्यंतरे परिमितभोजनं नक्तव्रते ॥ तदशक्तौ रतिकाद्वयपरिमितरूप्यमा
षकदानं ॥ तदभावे तन्मूल्यं ॥ दिवारात्रमभोजनमुपवासः ॥ तदशक्तौ रूप्यमा
षकत्रयदानं ॥ एकविप्रभोजनं सहस्रगायत्रीजपो वा द्वादशप्राणायामा वा ॥
अद्येत्याद्यमुकगोत्रामुकशर्मापक्षिवधजन्यपापक्षयकामो नक्तं करिष्ये तद
शक्तौ प्रतिनिधिरूपमिमं रूप्यमाषकं चंद्रदैवतममुकनामगोत्राय विप्राय हे
ददे इति इदं मूल्यं विष्णुदैवतमिति संकल्पः ॥ दानं च विप्रं संपूज्य द्रव्यमालभ्य
संप्रोक्ष्याभिमंत्र्य दद्यात् ॥ प्राजापत्यं तु त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं ॥
अहं परं तु नाश्नीयादिति ॥ सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिस्तथा ॥ अ
याचिते चतुर्विंशतिः ॥ सायं द्वादश प्रातः पंचदशेति वा ॥ ग्रासः कुक्कुटांडप्रमा
णो यावान्वा मुखं प्रविशेत् ॥ अत्र शक्त्या व्यवस्था ॥ उपवासे पिप्पलाहा
रादिकार्यम् ॥

आष्टौतान्यव्रतघ्नानि आपोमूलंफलंपयः ॥ हविर्ब्राह्मणकाम्याच गुरोर्वचन
मौषधमित्युक्तेः परंतुपरिमितमेवेति गौडाः इदमपिनेत्यपरे ॥ यद्वाक्रमेणैकभक्त
नक्तायाचितोपवासाः ॥ एवंत्रिंशद्वृत्तिः ॥ इदंबहूपवाससमं ॥ तद्दशकेपयस्वि
नीधेनुदानं ॥ तदभावेतन्मूल्यं ॥ मूल्यंतुगवामभावेनिष्कंस्यात्तदर्धंपादएवेति ॥
सुवर्णचतुष्टयसमतोलितैरूप्यंनिष्कं ॥ रूप्यपरिमाणेनिष्कंसुवर्णाश्चत्वारइति
याज्ञवल्क्यात् ॥ धेनुः पंचभिराढ्यानांमध्यमानांत्रिपुराणिका ॥ कार्षापणैकमू
ल्याहिदरिद्राणांप्रकीर्तितेतिषट्त्रिंशन्मते ॥ पंचभिःपुराणैरितिशेषः ॥ पुराणश्च
षोडशमाषवाच्छिन्नेरजतं ॥ रतिकाख्योगुंजापरिमितःकृष्णलः ॥ द्वयंरूप्यमा
षकः ॥ पणषोडशकमपिपुराणएवकार्षापणशब्देनकार्षिकशब्देनचोच्यते ॥
पणश्चाशीतिव्यवस्था ॥ चषषट्कार्षापणादयः रतिकापरिमितंताम्रमशीति
र्वराटिकावा ॥ ताम्रपणएवकर्षः ॥ रौप्यःपुराणोदक्षिणस्यां ॥ पणैःपूर्वस्या
मितिपंचे [illegible] तिशूलपाणिः ॥ केवलगोमूल्येतुपुराणत्रयमुत्तमःपक्षः ॥ द्वात्रिं
शत्पणामध्यमः ॥ एकःपुराणोधम इतिगौडाः ॥ दशकार्षापणाः ॥ दशकार्षा

न

पणाधेनोरश्वेपंचदशैव तु॥ द्वात्रिंशत्पणा गावो ह्यष्टावनडुहि स्मृता इति तु प्रा
यश्चित्तातिरिक्तदक्षिणाप्रसंगे धनवतो बोध्यम्॥ प्रसंगात् स्वर्णमानव्य
वस्थाप्यु॥च्यते॥ ॥गुंजापरिमितरक्तमल्लपंचकं स्वर्णमाषः॥ ते षोड
शाक्षशब्देन सुवर्णशब्देन बिस्तशब्देन चोच्यंते॥ सुवर्णाश्चत्वारः पलं निष्क
श्च॥ दशफलानि धरणमिति मनुस्मृतौ साष्टेशते सुवर्णानां हेम्न्युरोभूष
णे पले॥ दीनारेपि च निष्कोस्त्रीत्यमरः॥ दीनारो मोहर इति प्रसिद्धः॥ राजतः
पुराणो धरण इत्युच्यते॥ दशरूप्यधरणा राजतः शतमानः॥ स्वर्णपलशतं
भारः॥ भारविंशतिकं तुला॥ आचितो दशभारः स एव शाकट इत्यलम्॥ धे
नुमूल्यसममूल्ये भूधनधान्यवस्त्रस्वर्णरूप्यादिद्यात्॥ गायत्र्ययुतजपो वा
कृच्छ्रस्थाने॥ गायत्र्या द्वादशाधिकसहस्रसंख्याकैः सामिद्धुतहा वे धान्याना
मन्यतमस्य होमो वा तिलहोमस्तु सहस्रमेवेति केचित्॥ अप्पृताहुतिशतद्वयं
प्राजापत्यप्रत्याम्नायः इति चतुः संहितापारायणं वा प्राणायामशतद्वयं वा द्वा
दश विप्रभोजनं वाऽतिधनवतः षष्ठिः एकोपवासपूर्वकं द्वादशतिल

पात्रदानं वा तीर्थे दिशेन योजनगमनं वा रुद्रैकादशिनी वा शिरः शोषणपूर्वकं
द्वादशस्नानानि ॥ वा प्राजापत्यमेव कृच्छ्रपादेन कृच्छ्रंतु त्र्यहं प्रातस्त्र्यहं सायं त्र्य
हमयाचितं त्र्यहमुपवासैर ॥ कृच्छ्रार्धन्तु सायंप्रातस्तथैवैकं दिनद्वयम
याचितं त्र्यहमु+ इति अत्र चतुःपणाधिककार्षापणद्वयमशक्तौ देयम् ॥ एवं कृ
भक्तायाचितोपवासपादैरेतदिति स्मृत्यर्थसा+ पवास इति आयाचितोपवा
सपादाभ्यामेतदिति स्मृत्यर्थसारे ॥ इदं सार्धकार्षापणसममिति गौडाः ॥ पादकृ
च्छ्रं एकैकदिनक्रमेण चतुष्टयं ॥ इदं द्वादशपणसमम् ॥ इदमेव शिशुकृच्छ्रः ॥ वि
प्रादिवर्णक्रमेण उपवासत्रयायाचितत्रयनक्तत्रयैकभक्तत्रयरूपाः पादकृच्छ्रा
इति आपस्तंबः ॥ अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः अयं प्राजापत्यः
अत्र येषु नक्तादिषु भोजनं तेषु पाणिपूरान्नता ॥ नवाहमेकैकग्रासो ऽत्यदिनत्र
यमुपवासोऽतिकृच्छ्र इति मनुः ॥ अत्र प्राजापत्यत्रयमिति चतुर्विंशतिमते ॥ कृच्छ्रा
तिकृच्छ्रः पयसा दिवसानेकविंशतिम् ॥ पयोऽत्र जलं ॥ तच्च सायंप्रातर्मध्या
न्हेषु पेयं ॥ द्विगुणोऽतिकृच्छ्र एव कृच्छ्रातिकृच्छ्र इति यमः ॥ तेनायं षट् प्राजापत्यसमः
तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान् प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी स
माहितः ॥

तप्तकृछ्र

उष्णोदकात्निर्गतवाष्पस्यपानमुष्णानिलपानेन।। एतच्चत्रिरात्रमास्यपूर
णमात्रपर्यंतम्।। उष्णक्षीराद्यु।। तत्रषट्पलमंबुत्रिपलंक्षीरमेकपलंघृतम्।।
एषएवशीतैः शीतकृछ्रः।। अत्रधेनुत्रयमितिषट्त्रिंशन्मते।। अतिकृछ्रेयोर्धेनु
द्वयमित्यपरार्कभवदेवौ।। पादोनधेनुचतुष्टयमितिशूलपाणिः।। तप्तक्षीराघृतांबु
नामेकैकंप्रत्यहंपिबेत्।। एकरात्रोपवासश्चतप्तकृछ्रउदाहृतइत्यपरस्तप्तकृछ्रः
अत्रैकाधेनुः।। पर्णकृछ्रस्तुपर्णोदुंबरराजीवबिल्वपत्रकुशोदकैः।। प्रत्येकंप्रत्य
हाभ्यस्तैः पर्णकृछ्रउदाहृतः।। एषांक्वाथोदकैरित्यर्थः।। पर्णः पलाशः।। राजीवं
पद्मं।। अयंसार्धोपवासद्वयतुल्यः।। त्रिरात्रेणैतानिसमस्तान्युपयुक्तानिपर्णकू
र्चः।। मूत्रमेकपलंदद्यादंगुष्ठार्धंतुगोमयं।। क्षीरंसप्तपलंदद्याद्दधित्रिपलमुच्यते।। +
१ त्रिरात्रोपवासांतेपलाशादिपंचकक्वाथोदकपानमपरः पर्णकूर्चः।। चतुर्दश्यामु
पोष्यपरेद्युः पूर्णिमायांपंचगव्यपानंब्रह्मकूर्चः।।+।। घृतमेकपलंदद्यात्पलमे
कंकुशोदकमितिपंचगव्यस्वरूपं।। एतत्पानंचभोजनस्थाने।। अत्रार्धाधेनुः।।
अत्रहोमोप्यस्ति।। पंचगव्यस्यहोमश्चमध्यमपलाशपत्रेणपद्मपत्रेणस्वर्णपा
त्रेणताम्रपात्रेणब्राह्मतीर्थेनवा।। एषसांतपनभेदइतिस्मृत्यर्थसारे।। पराकस्तु

द्वादशाहोरात्रोपवासः ॥ अत्र पंच धेनव इति शूलपाणिः ॥ द्वे इत्यपरार्कभ
वदेवौ ॥ तिस्त्र इति षट्त्रिंशन्मते ॥ सौम्यकृच्छ्रस्तु पिण्याकाचामतक्रांबुस
क्तूनां प्रतिवासरं ॥ एकांतरोपवासश्च सौम्यः कृच्छ्रोयमुच्यते ॥ षष्ठेहन्यु
पवासः ॥ पिण्याकं तिलपींडा ॥ आचाम ओदनस्रावः ॥ अत्रैका धेनुरिति
कश्चित् ॥ अर्धोचिता ॥ पिण्याकं सक्तवस्तक्रं चतुर्थेहन्यभोजनं वासो वै
दक्षिणां दद्यादित्यपरः ॥ सौम्यकृच्छ्रः ॥ अत्रोभयत्रापि प्राणायामात्र निर्वाहक्ष
मपिण्याकादिग्रास्यं ॥ पिण्याकादीनां पंचानां प्रत्येकं त्रिरात्रोपयोगाभ्यासे पं
चदशाहिकस्तुलापुरुषः ॥ एषां पंचानामेकैकस्य त्र्यहं त्र्यहं भोजने त्र्यहद्वयं
वायुभक्षणे चैकविंशतिरात्रसाध्यस्तः ॥ मासपरिमितसक्तूदकपाने वारु
णकृच्छ्रः ॥ त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् त्र्यहं यावकं ॥ एषस्त्रीकृ
च्छ्रः ॥ यवानामप्सु साधितानां सप्तरात्रं पक्षं मासं वा भोजनं यावककृच्छ्रः ॥
अनश्ननूजलमध्यस्थ अहोरात्रं जपन् क्षिपेदेव जलकृच्छ्रः ॥ उदकसक्तूनां मा
साभ्यवहारेणापरः सः ॥ बिल्वैर्वामलकैर्वापि प्राक्षैरथवाशुभैः ॥ मासेनेलोके
पं१

श्रीकृच्छ्रः कथ्यते द्विजसत्तमैः ॥ गोमूत्रपक्वयावकपान एव गोमूत्राख्यः कृच्छ्रः ॥
इत्युक्ताः कृच्छ्राः ॥ अथ सांतपनानि ॥ पूर्वेद्युः पंचगव्यमात्राहारः परेद्युरुपवासः
एतदशक्तावेकः पुराणः ॥ एतदेव त्र्यहाभ्यस्तं यतिसांतपनं स्मृतम् ॥ अत्रापि होमः
एतदेव पञ्चगव्योपवासोभयात्मकमेव ॥ एवं च षडहसाध्यमेतत् ॥ गोमूत्रगोम
यक्षीरदधिसर्पिःकुशोदकानि क्रमेणैकैकमहं पीत्वा एकरात्रोपवासेन सप्ताह
साध्यो महासांतपनः ॥ अत्र धेनुद्वयम् ॥ इतरेषु प्रागुक्तसांतपनेषु सार्धेति षट्त्रिंशो
न्मते उक्तं ॥ प्रथममुपवासस्ततः क्रमेणैतत्षट्कपानमिति प्राच्याः ॥ गोमूत्रगो
मयदधिक्षीरसर्पिषां क्रमेणैकैकस्य त्र्यहं त्र्यहमुपयोगे पंचदशाहिकं तत् ॥ षण्णा
मेकैकमेतेषां त्रिरात्रमुपयोजयेत् ॥ त्र्यहं चोपवसेदंत्यमित्येकविंशतिरात्रसाध्य
म् ॥ षट्त्वं कुशोदकसाहित्येन ॥ एतान्येव तु पेयानि एकैकं तु द्व्यहं द्व्यहं ॥ अतिसांत
पनं ह्येतदिति द्वादशरात्रसाध्यं ॥ इति सांतपनानि ॥ ॥ अथ चांद्रायणानि ॥ एकैकं
ह्रासयेत्पिंडं कृष्णे शुक्ले च वर्धयेत् ॥ उपस्पृशंस्त्रिषवणमेतच्चांद्रायणं स्मृतं ॥ कृ
ष्णप्रतिपद्यस्यारंभस्तामारभ्यैकैकं ह्रासयित्वा चतुर्दश्यामेकं ग्रासित्वाऽमायामुपो
ष्य पुनः शुक्ले प्रतिपदमारभ्य पूर्णिमांतं यावद्वर्धयेत् ॥ ग्रासश्च मयूराण्डप्रमाणः

ले
आर्द्रमिकप्रमाणो वा ॥ इदं पिपीलिकामध्यम् ॥ एवमेव विधिं कृत्स्नमाचरेद्यव
मध्यके ॥ शुक्लपक्षादिनियतं चरेच्चान्द्रायणव्रतं ॥ अत्र शुक्लप्रतिपदादि ग्रासवृद्धिः
पूर्णिमोपेत तो ह्रासोऽमान्तम् ॥ अनयोरष्टधेनवः ॥ वृषभसहिता गोश्चात्र द
क्षिणा ॥ सार्धसप्तधेनव इति शूलपाणिः ॥ इदं चातिध्वनिनः ॥ प्राजापत्यत्रयम
प्यन्यस्येत्येके ॥ अत्रैकादश्यादिव्रतलोपो न दोषावहः ॥ अष्टावष्टौ समश्नीयात्पि
ण्डान्मध्यंदिने स्थिते ॥ नियतात्मा हविष्यस्य यतिचान्द्रायणं स्मृतं ॥ मासमिति शेषः
यतिचान्द्रायणं प्राजापत्यचतुष्टयसममिति बृहद्विष्णुः चतुरः प्रातरश्नीयात्पि
ण्डान्विप्रः समाहितः चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतं ॥ मासंत्री [illegible] न्पिं
डान्समश्नीयान्नियतात्मा दृढव्रतः हविष्यान्नस्य वै मासमृषिचान्द्रायणं स्मृतं ॥
अनुपदोक्ताभ्यां किंचिदधिकं द्विगुणमेतत् ॥ अनुपदोक्तयोः पादोनचतुष्टयधे
नुदानमिति शूलपाणिः ॥ पत्न्यृषिचान्द्रायणेऽपि तावदेवेत्युक्तं ॥ यच्चान्यैर्धेनुत्रयमि
त्युक्तं तत्रोपपत्तिश्चिन्त्या ॥ गोक्षीरं सप्तरात्रं तु पिबेत्स्तनचतुष्टयात् ॥ स्तनत्रयात्स
प्तरात्रं सप्तरात्रं स्तनद्वयात् ॥ स्तनात्तथैव षड्रात्रं त्रिरात्रमितभुग्भवेत् ॥ एतत्सोमा
यनं नाम व्रतं कल्मषनाशनमिति ॥ प्रतिदिनं संख्यानियमानादरेण मासमात्रे च

त्वारिंशद्धिकशतद्वयग्रासानां पंचविंशत्यधिशतद्वयग्रासानां वा ॥ऽशतेपि चांद्रा
यणं ॥ ओघद्वयातिरिक्तचांद्रायणानां दिनांतरेप्यारंभो न प्रतिपद्येवेति नियमः ॥
इति चांद्रायणानि ॥ ॥ पंचगव्यप्रमाणं तूक्तं ॥ गोशकृद्द्विगुणं मूत्रं घृतं विद्याच्चतुर्गु
णम् ॥ क्षीरमष्टगुणं प्रोक्तं पंचगव्ये तथा दधि ॥ तथाष्टगुणमिति प्राच्याः ॥ गोमूत्रमा
षकान्यष्टौ गोमयस्य तु षोडश ॥ क्षीरस्य द्वादश प्रोक्ता दध्नः पंचदश स्मृताः ॥ कुशो
दकसाहित्यं चात्रेत्यन्यो दध्नि दशमाषकाः ॥ सर्पिष्यष्टौ ॥ कुशोदके नदर्धं तेतिस्मृ
त्यर्थसारे ॥ ताम्रवर्णाया गोमूत्रं ॥ श्वेताया गोमयं ॥ पीतायाः क्षीरं ॥ नीलाया द
२ धि ॥ कृष्णायाः सर्पिरिति ॥ तच्च प्रणवेनाहृत्य तेनैवोत्थाप्य तेनैव समालोड्य
तेनैव पिबेत् ॥ वक्ष्यमाणेषु प्रायश्चित्तेषु सामान्यतो व्रतशब्दो गोमूत्रयावकाहार
वचनः ॥ दिनरात्रिशब्दौ तत्तद्वचनावेव ॥ उपवाससमभिव्याहारे त्वहोरात्रवच
नः ॥ अहःशब्दश्चाहोरात्रपर इति क्वचिद्ग्रंथेव्यवस्थोक्ता ॥ मासोपवासे पंचदश
प्राजापत्यानि ॥ कृच्छ्राद्धं त्रिंशद्धेनुसमं ॥ गोमूत्रपाचितयावकस्य मासं पाने द्वादश
प्राजापत्यानि ॥ पाकोत्तरमीषद्गोमूत्रयुक्तयावकपानं कृच्छ्रद्वयसमं ॥ सार्धकृच्छ्रद्व
यसममित्यन्ये ॥ त्रिंशन्नक्तैर्दशोपवासास्तत्र कृच्छ्रचतुष्टयम् ॥ उपवासस्थाने ए

कविप्रभोजनं शक्तोद्वो ॥ गायत्रीसहस्रजपः ॥ द्वादशप्राणायामा वा ॥ द्वादशवा
र्षिकादिषु द्वादशदिनैरेकैकप्राजापत्यकल्पना ॥ अतएव चतुर्विंशतिमते कृत्वा
वी॥ ब्रह्महत्यायां षडब्दं कृच्छ्रमाचरेत् ॥ प्रत्याम्नायो गवां देयः सांशीतिधनिना
ग्राते ॥ तथाष्टादशलक्षाणि गायत्रीं वा जपेद्बुध इति ॥ गायत्र्यास्तु जपेत्कोटिं ब्र
ह्महत्यां व्यपोहतीति तु द्वादशाब्दसमकक्षं न तु प्रत्याम्नाय इति बोध्यम् ॥ त्रैमासिके
सार्धसप्तप्राजापत्यानि ॥ मासिकेव्रते सार्धप्राजापत्यद्वयं ॥ अर्धषण्मेकादशगो
दानसहितत्रिरात्रोपवासात्मकगोवधव्रते सार्धैकादशमासं पयोव्रते सार्धप्रा
जापत्यद्वयं ॥ मासं पंचगव्यपानेप्येवमेव ॥ षडुपवासेप्येकं प्राजापत्यं ॥ त्रैमा
सिकगोवधव्रते सत्यपि स्मृत्यर्थसारे ॥ त्रैमासिकगोवधव्रतेन वा ॥ योगीश्वरो
क्तमासिकव्रते त्रीणि तत्सममेकं चान्द्रायणं वेति मिताक्षरा ॥ व्रतशब्दश्च सोन्यतो
यावकपानवचनं ॥ यत्तु ब्रह्मवधोक्तद्वादशवार्षिकेशीत्युत्तरशतधेनवस्तावं
त्ति प्राजापत्यानि वेति प्राच्यास्तत्तु प्रागुक्तचतुर्विंशतिमतविरुद्धमित्येके ॥ तत्रग
वामित्युक्ते [illegible] श्चा ॥ अन्येषां सवत्सधेनव इत्युत्सएवो
चिता इति तत्वमित्यपरे ॥ अथ कृच्छ्रस्थाने तीर्थप्रत्याम्नायाः उच्यते ॥ ॥

मा

भागीरथ्यां स्नानं षष्टियोजनागतस्य षडब्दकृच्छ्रसमं ॥ अत्र यात्रायोजनवृद्धौ योजनस्यार्धकृच्छ्रवृद्धिः ॥ एकयोजनागतस्य मध्ये पर्वताद्यव्यवधाने कृच्छ्रत्रयं तृतीयांशाधिककोशादागतस्य भागीरथ्यां विध्युक्तस्नाने एकः कृच्छ्रः ॥ प्रयागे द्विगुणं ॥ गंगाद्वारे गंगासागरसंगमे चैवं ॥ वाराणस्यामगणितं तस्यां महापातकं न प्रविशति ॥ सर्वत्र यात्रा देशांतरे भाषाणां भेदविशेषे महापर्वतव्यवधाने महानदीव्यवधानक्रमेण द्वादशाष्टचतुर्योजनेन्यूने षट्चतुर्द्वियोजनेन्यूने वा विंशतियोजनागतस्य यमुनायामब्दसमं ॥ द्व्यब्दसममित्यन्ये ॥ मथुरायां द्विगुणं सरस्वत्यां चतुरब्दसमं ॥ चत्वारिंशद्योजनागतस्य प्रभासद्वारकवत्यां द्विगुणं ॥ एतयोर्नद्योर्योजनवृद्धौ पादकृच्छ्रवृद्धिः ॥ दृषद्वतीशतद्रुविपाशावितस्ताशरावतीमरुद्वृधामधुमतीपयस्विन्यादिदेवनदीषु त्रिंशद्योजनागतस्यार्द्धं पंचयोजनागतस्येत्यन्ये ॥ चंद्रभागावेत्रवतीशरयूगोमतीदेविकाकौशिकीमंदाकिनीपुनःपुनापूर्णपुण्याबाहुदावारुणीगंडक्यादिदेवनदीषु पंचदशयोजनागतस्य षोडशकृच्छ्राणि ॥ त्रिंश ॥ द्योजनागतस्येत्यन्ये ॥ परस्परसंगमे द्विगुणं ॥ त्रिगु

॥णमित्यन्ये ॥

अन्यासु समुद्रगासु तावद्योजनागतस्य षट्कृच्छ्रसमं ॥ महानदेषु महानद्य
र्धं शोणमहानदे गंगार्धं नदेषु नद्यर्धं ॥ वैरोचने तु नदे महानद्यर्धम् ॥ पुष्करं
प्रयागसमं सन्निहत्या च ॥ नर्मदायां चतुर्विंशतियोजनागतस्य चतुर्विंश
ति कृच्छ्रसमं ॥ कुब्जिकासंगमे द्विगुणं ॥ शुक्लतीर्थे चतुर्गुणं ॥ नर्मदायाः ताप्यां
पयोष्ण्यां च संगमे द्विगुणं ॥ गोदावर्यां षष्टियोजनागतस्य त्र्यब्दं ॥ वंजराभ्र
णीतयोर्नर्मदावत् ॥ पर्णायां योजनेर्धकृच्छ्रं ॥ कृष्णावेणातुंगभद्रयोः प्रति
योजनं कृच्छ्रं ॥ पंपायां द्विगुणं ॥ हरिहरे त्रिगुणं ॥ कुल्यास्त्रिरात्रफलदाः ॥
अल्पनद्यः कृच्छ्रदाः ॥ महानद्यास्त्रिकृच्छ्रदाः ॥ सर्वत्र तीर्थपुण्यक्षेत्रादौ योज
नसंख्यया कृच्छ्रसंख्या ॥ एकयोजनगादिषड्योजनगाताः स्रवत्यः कुल्याः ॥
ततो द्वादशयोजनगांता अल्पनद्यः ॥ ततश्चतुर्विंशतियोजनगांता नद्यः तदधि
का महानद्यः समुद्रगाश्च उपवाससहितं नदीस्नानं कृच्छ्रसमं योजनादर्वाक्
अपि ॥ शुनी गर्दभी चांडाली शद्रीकष्टादिनद्यः पापनद्यश्च वर्ज्याः ॥ सर्वत्र
समुद्रस्नाने दर्शे कार्यं ॥ देवतासमीपस स्सरिन्नदीसंगमेषु सदा कार्यं ॥

समुद्रस्नाने पंचदशयोजनागतस्य पंचदशाच्छ्राणि इत्यादि स्मृत्यर्थसारे विस्तरः ॥ परार्थं गंता तीर्थषोडशांशं लभते ॥ प्रसंगेन गंता अर्धफलं ॥ अनुषंगेण तीर्थं प्राप्य स्नाने स्नानफलमेव न यात्राफलं ॥ पितामहप्रपितामहभ्रातृमातामहपितृव्यमातुलश्वशुरपोषकार्थं गुर्वाचार्योपाध्यायतत्पत्नीमातृष्वसृपितृष्वस्रर्थं स्नात्वा स्वयमष्टांशं लभते ॥ पित्रोरर्थं कुर्वन्पुत्रश्चतुर्थांशं ॥ दंपतीच सपत्न्यश्चेल्लभंतेर्धं मिथः फलम् ॥ अर्थिनां न फले ह्रासः ॥ शुश्रूषाफलमीदृशं ॥ कर्कादौ मासद्वये निरंतरं रजस्वला नद्यः ॥ तासु चापि गोमती चंद्रभागा सिंधुनर्मदाशरय्वश्च त्रिरात्रम् ॥ वापिकूपादिषु स्वच्छेतपुराणोदकेषु त्रिरात्रं ॥ सरस्वती गंगा यमुना द्यो न कदापि रजस्वलाः ॥ अत्र व्रतांगभूता धर्मा यमा नियमाश्च ॥ ब्रह्मचर्यं दया क्षांतिर्दानं सत्यमकौटिल्यमहिंसास्तेयं माधुर्यं दमश्चेति दश यमाः ॥ स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहगुरुशुश्रूषाशौचाक्रोधाप्रमादता इति नियमा दश ॥ ॥ अथ प्रायश्चित्तपूर्वाह्नकृत्यं ॥ केशान्नखान्निवापयित्वा स्नात्वा घृतप्राश्य प्रदोषे गृहाद्बहिर्व्रतकालसंख्योल्लेखपूर्वकं ॥ संकल्पः कार्यः ॥

वपनंचमहापातकगोवधालिरितेकृ विद्वद्विप्रनृपसधवस्त्रीणांनास्ति॥ तत्रसधवानांसर्वान्केशान्समुध्धृत्य द्व्यंगुलछेदनमेवनतन्तु॥ तीर्थेष्वप्यासामेवमेव अधवानांतुसर्ववपनं॥ केशधारणेच्छायांतुद्विगुणंव्रतंकार्यं॥ तत्रेदक्षिणापिद्विगुणा॥ वपनंचदिनत्रयसाध्यव्रतेनखछेदनमात्रं॥ षट्दिनसाध्येश्मश्रुणोपि॥ नवदिनसाध्येशिखावर्जं॥ तदूर्ध्वंसशिखम्॥ त्रिषट्दिनयोःस्त्रीणांनेवलतु॥ धेनुदानादावप्येवं॥ अस्यनैमित्तिकत्वात्सदाबद्धशिखेनत्वित्यनेननविरोधः॥ प्रायश्चित्तंचाष्टमीचतुर्दश्योर्नकार्यं॥ चतुर्दश्यांसंकल्यामायांकार्यमितिशिष्टाचारः॥ तत्रपापंद्विविधं॥ रहस्यप्रकाशंच॥ कर्तृव्यतिरिक्तैरज्ञातदोषोरहस्यम्॥ तत्रप्रकीर्णकादिषुपंचविंशतिःप्राणायामाः॥ उपपातकेतादृशीशतं॥ अनुपातकेद्विशतं॥ अतिपातकेत्रिशतं॥ महापातकेचतुःशतं॥ सर्वत्राभ्यासेद्विगुणं॥ मत्यात्रिगुणं॥ मत्याभ्यासेचतुर्गुणं॥ यद्वागायत्र्यालक्षजपोमहापापे॥ पादोनलक्षजपोतिपापे॥ पादलक्षमुपपापे॥ मत्याद्विगुणंतदर्धार्धप्रकीर्णकादिषु॥ अन्यान्यपिरहस्यप्रायश्चित्तानि

रहस्येषु

२ अर्धलक्षमनुपापे

निवंधेभ्योग्राह्याणि ॥ अविद्वान्मुखांतरेण व्याज्ञात्प्रायश्चितं ज्ञात्वा रहश्चरे
त् ॥ विद्वांस्तु स्वयमेव ॥ दशलक्षगायत्रीजपस्सर्वप्रायश्चितम् ॥ सर्वेषामेवपा
पानांसंकरे समुपस्थिते दशलक्षं समभ्यस्ता गायत्री पावनं महदितिस्मरणात्
तथाभस्मच्छन्नोभस्मशायनो रुद्रजापी सर्वपापान्मुच्येत ॥ सचैकादशवारं ॥
अत्र सर्वशब्देन महापापव्यतिरिक्तं ग्राह्यमिति केचित् ॥ महापापान्यपि सर्वश
ब्देनेति परे ॥ पुरुषसूक्तं प्रत्यहं षोडशकृत्वो जपन्मासेन शुध्येत् ॥ अत्राहार
विशेषानुक्ते पयः प्रभृतयः ॥ शिलोञ्छयादयो माघादयश्च देशकाले ॥
अतिरिक्तेषु व्याहृतिभिराचमनं ॥ एवं ख्यापनानुतापाध्ययनतपांस्यपिपा
पनाशकानि ॥ ख्यापनं सभासु पुण्यस्थानेषु च स्वपापकथनपूर्वकमात्मनिंद
नं ॥ अध्ययनं वेदस्य वेदांतादेश्च ॥ उपदिष्टप्रायश्चितेष्वेतदंगं ॥ अन्यथात
द्विधिरफलः स्यात् ॥ कृते पापेनुतापो वै यस्य पुंसः प्रजायते ॥ प्रायश्चित्तं तु
तस्योक्तं हरिसंस्मरणं परं ॥ प्रातनिशि तथा संध्यामध्याह्नादिषु संस्मरन् ॥ ना
रायणमवाप्नोति सद्यः पापक्षयं नरः इति विष्णुपुराणे ॥ अत्र केचित् अनेन च

॥ व्यवहार्यतात्वेति प्रसंग निवारणा मन्वादिप्रायश्चित्तैरेव ॥ रागद्वेषादि कलुषहृदयतया तत्राविश्वतो
॥ जनान्प्रति ॥१॥

सर्वपापप्रणाशो भवत्येव ॥ इहैव व्यवहार्यतासिद्धियेवा तदुपदेश इति प्राहुः ॥ गंगा
स्नानं च सर्वविध सर्वपापनाशकम् ॥ चांद्रायणसहस्रं तु यश्चरेत्कायशोधनं ॥
पिबेद्यश्चापि गंगांभः समोस्यान्नान वासमौ ॥ भवंति निर्विषाः सर्वो यथा तार्क्ष्य
स्य दर्शनात् ॥ गंगाया दर्शनात्तद्वत्सर्वपापैः प्रमुच्यते इत्यादि भारतवचोभ्यः ॥
न चैतान्यर्थवादः ॥ स्नानमात्रेण गंगायां पापं ब्रह्मवधोद्भवं ॥ दुरोधर्षं कथं याति
चिंतयेद्यो वदेदपि ॥ तस्याहं प्रददे पापं कोटिब्रह्मवधोद्भवं ॥ स्तुतिवादमिमं मत्वा
कुंभीपाकेषु जायते ॥ आकल्पं नरकं भुक्त्वा ततो जायते गर्दभ इति भविष्यत्को
र्मादिभ्यः ॥ पापिनां पापहर्तृत्वं स्वर्गमोक्षैकहेतुता ॥ स्वभाव एव गंगायाः शैत्यं
शीतरुचेर्यथा ॥ न गंगासदृशं तीर्थं न देवः केशवात्परः ॥ ब्राह्मणेभ्यः परं नास्तीत्ये
वमाह पितामहः ॥ सर्वं कृतयुगे पुण्यं त्रेतायां पुष्करं स्मृतं ॥ द्वापरे तु कुरुक्षेत्रं क
लौ गंगैव केवला ॥ गंगा कलियुगे स्मृता इति पाठांतरं ॥ यद्यकार्यशतं कृत्वा कृतं गं
गावसेचनं ॥ सर्वं तत्तस्य गंगांभो दहत्यग्निरिवेंधनमित्यादिवचनान्यप्यनुसं
धेयानि ॥ कलियुगीयपापनाश सामर्थ्यं गंगाया एव पुष्करादीनां ॥ कृतादौ तु

पापस्याल्पत्वात्॥ तन्नाशसामर्थ्यन्तेषामपीति सर्वेष्वत इत्यस्य तात्पर्यम्॥ ॥अ
थ सर्वप्रायश्चित्तविधिः॥ ॥ तत्र महापातकादर्वाचीनेषु बहुविधेष्वज्ञानात्कृ
तेषु प्रतिनिमित्तं कर्तुमशक्तो सर्वप्रायश्चित्तं षडब्दमत्यंतगुणवतोत्यंतविरक्त
स्य॥ अभ्यासे द्विगुणम्॥ मत्यात्रिगुणं॥ मत्याभ्यासे चतुर्गुणं॥ अत्यंताभ्या
से निरंतराभ्यासे पंचगुणम्॥ बहुकालाभ्यासे षड्गुणं॥ उपपातकमारभ्या
र्वाचीनेषु पापेष्वज्ञानात्कृतेषु तादृशस्य प्रतिनिमित्तं कर्तुमशक्तो द्व्यब्दं सर्वप्रायश्चि
के७ त्तं॥ अभ्यासादौ प्राग्वत्॥ प्रकीर्णेषु क्षुद्रपापेषु बहुषु तादृशेषु तादृशस्य प्रति
निमित्तं कर्तुमशक्तो वर्षं वा षट्त्रिंशत्संख्याकप्राजापत्यात्मकं सर्वप्रायश्चित्तं॥
अभ्यासादौ प्राग्वत्॥ अतिक्षुद्रपापेषु बहुषु तादृशेषु तादृशस्य प्रतिनिमित्तं
कर्तुमशक्तो सर्वप्रायश्चित्तं कृच्छ्रातिकृच्छ्रचांद्रायणानि॥ तत्स्थाने द्वादशकाया
नि वा॥ अभ्यासादौ प्राग्वत्॥ इदं चोत्तमस्य॥ मध्यमस्य द्विगुणम्॥ जघन्यस्य त्रि
गुणं॥ द्वादशाब्दं द्विगुणं त्रिगुणं वा महापातकावधि सकलपापप्रायश्चित्तमिति
सर्वपापप्रायश्चित्तविधिः॥ सर्वानुक्तनिष्कृतौ कृच्छ्रातिकृच्छ्रचांद्रायणानि स

मस्तव्यस्तरूपेणयोग्यतयायोज्यानि॥क्षुद्रेषुपापेषूपवासत्रिरात्रप्राजापत्यानि
योग्यतया॥अतिक्षुद्रेषुद्वादशषट्त्रिप्राणायामास्तया॥स्त्रीशूद्राणाममंत्रका
स्ते॥पुरुषाहारहंतकाराग्रदानानिवा॥होमांगलोपेव्याहृत्याज्याहुतिःकर्मांगलो
पेतज्जपः॥मौनलोपेविष्णुस्मरणंअज्ञानन्यूनादिपूर्त्यर्थमपि॥ ॥अथप्रका
रेषुउद्देशक्रमेणप्रकीर्णकप्रायश्चित्तान्युच्यंते॥ ॥खरेणोष्ट्रेणवायुक्तंयानमारु
ह्याध्वगंता॥नग्नस्नायी॥नग्नःसन्नन्नभोक्तादिवास्वदारगामी चमुत्यासचैल
स्नानपूर्वकंप्राणायामेनशुध्येत्॥अमत्यास्नानमात्रम्॥अभ्यासेप्राणायाम
चतुष्टयं॥चतुरधिकाभ्यासेएकउपवासः॥अत्यंताभ्यासेत्रिरात्रं॥साक्षात्खरो
ष्ट्रादिरोहणेद्विगुणम्॥गुरुंत्वंकृत्यहीनपुरुषंप्रयोज्यहिंकृत्वाछत्वावादेविप्रंनि
र्जियवस्त्रेणापिवाविप्रस्यकंठेबंधनेतृणेनापिवातस्यताडनेगुर्वादिकंशीघ्रंनत्वा
विगतकोपंकृत्वानतंभुंजीत॥उपवसेदितिस्मृत्यर्थसारे॥अभ्यासेत्रिरात्रम्॥
गुर्वृषिदेवविप्राचार्यमातापितृनरेंद्रान्प्रतिष्ठीवनेप्रतिवदनेआक्रोशनेतिक्र
मपैशुनेवाअव्हांदहेद्धिरण्यंदद्यात्॥एतदभ्यासेसहस्रत्रयगायत्रीजपोवा॥

॥२४

अमतिपूर्वं तु प्राजापत्यं कृत्वा सचैलस्नानपूर्वकं गुरुप्रसादात्पूतो भवति ॥ ए-
षामल्पदुःखकरे प्रसादनं ॥ शूद्रस्य विप्रातिक्रमादौ सप्तरात्रं भोजनं ॥ क्षत्रियाति-
क्रमादौ त्वेक उपवासः ॥ विप्रं हं तुं दंडोद्यमे कृच्छ्रः ॥ इदमेवावगूरणं ॥ निपातने-
ति कृच्छ्रः ॥ अतिरक्तस्रावे कृच्छ्रातिकृच्छ्रः ॥ अत्यंततररक्ते च भेदावातिकृच्छ्रः
अस्थिभेदे तिकृच्छ्रः ॥ अंगकर्तने पराकः ॥ केचित्तु दंडोद्यमनिपातनेस्रावेष्वर्ध रुधिर
कृच्छ्रकृच्छ्रातिकृच्छ्राण्याहुः ॥ अन्ये तु पादकृच्छ्रार्धकृच्छ्रकृच्छ्राण्याहुः ॥ तेषां कामाकाम-
भेदेन व्यवस्था ॥ अंगच्छेदे दश गोदानं ॥ कामतो द्विगुणं ॥ अत्र यद्यपि शोणितपा-
तने निपातनावगोरणे आवश्यके तत्र तन्निमित्ते प्रायश्चित्ते पृथङ्न भवतः ॥ यतस्त-
त्रावश्यंभावित्वेन तदभ्यंतरवर्तित्वात् ॥ यत्र पुनर्निमित्तानां नांतर्भावनियमस्त-
त्र पृथग्भवत्येव ॥ यथा पर्वणि परभार्यां रजस्वलां तैलाभ्यक्तो दिवा गच्छति जलइति
विप्रस्य पादप्रहारे उपोष्य सचैलं स्नायात् ॥ कामतः स्नात्वा प्रणिपत्य प्रसादनं ॥
पादेन स्पर्शे तु प्रसादनमेव ॥ विप्रस्य रुजं कृत्वा राजसभादिप्रयाणं निंदिताद्धेना
दानेन च कृत्वा कृच्छ्रार्ध ॥ देवसंनिधौ अप्सु चाग्नौ चानातस्य विण्मूत्राद्युत्सर्गे सचैल-
स्नानपूर्वं गोस्पर्शः ॥ मत्या तूपोष्य सचैलं स्नायात् ॥ कामतोभ्यासे उपवासत्रयं ॥

इदमापः प्रवहते त्यस्य गायत्र्या वा जपश्च ॥ अनापदि त्रिषवणस्नानं त्रिरघम
र्षणं च बोध्यम् ॥ अत्यंताभ्यासे सत्स कृच्छ्रं ॥ उदकं विना मूत्राद्युत्सर्गे प्येवमेव
इदं च मूत्रपुरीषोत्सर्गोक्त धर्मोपलक्षणं ॥ निर्जलारण्यादौ त्वेपोद्धृत्यैव शौचं स
चैलस्नानं कुर्यात् ॥ मूत्रादिवेगधारणं तु न कुर्यात् ॥ श्रौतस्मार्तकर्मलोपे उपवा
सः ॥ इदं च दिनत्रयातिक्रमे अन्यथा गायत्र्या अष्टोत्तरशतं जपः ॥ इदं चानुक्त
प्रायश्चित्तविशेषश्रुतिस्मृत्युदितकर्मलोपे बोध्यम् ॥ विप्रत्वप्रयुक्तमृषाशापथक
रणे यावकेन चांद्रायणं ॥ क्षत्रियविषयतत्करणे पराकः ॥ विशस्तत्करणे प्राजाप
त्यं शूद्रस्य तत्करणे त्रिरात्रं शूद्रह व्रतं ॥ सूर्योदये स्वच्छामत्या सुप्तोह्नि तिष्ठन् सा
वित्रीं जपन्नुपवसेत् ॥ तदस्तमये सुप्तो रात्रौ तिष्ठन् सावित्रीं जपन्नाद्यात् ॥ स्नाना
दिकर्मलोपे त्युपवासो ऽष्टशतं गायत्रीजपो वा ॥ जीर्णवस्त्रधारणादौ स्नातकव्रत
लोपे चोपवासो ऽष्टशतं गायत्रीजपो वा ॥ पंचमहायज्ञेष्वन्यतमलोपे ऽनातुरस्योपवासः
धनिनः कृच्छ्रार्धं ॥ आहिताग्नेः पर्वण्युपस्थानलोपे चैवं ॥ स्नानं विना भोजने एक
उपवासो दिनं व्याप्य जपश्च ॥ ऋतौ भार्याऽगमने कृच्छ्रार्धम् ॥ अकामतः प्राणा
यामशतम् ॥ इदं चापर्वणि सन्निहितस्यारोगिण एव ॥ षोडश्यां रात्रौ तु पर्वण्यपि

गुछेत् ॥ स्वभार्यां क्रोधाद् गम्येति वदतां वर्णानां कृछ्र नव षट् त्रिरात्राणि सर्ववर्णा
नां प्राजापत्यमेवेति गोतमः ॥ त्यागानंतरं संग्रहेछायामपि चांद्रायणं कृत्वा स कार्यः ॥
एकपंक्त्युपविष्टानां स्नेहादिना विषमदाने च प्राजापत्यं ॥ नदीसंक्रमहर्तुश्च कन्या
विघ्नकर्तुस्य च ॥ समे विषमकर्तुश्च कृछ्रोब्दो चांद्रायणं स्मृतं ॥ संक्रमो वेतरणमार्गः ॥
पूजादौ मार्गादौ च समे विषमकर्तृत्वं ॥ अत्र चांद्रायं भैक्षान्नेनेति स्मृत्यर्थसारे ॥ णं५
पतितम्लेच्छादिभाषणे पुण्यवस्तुध्यानं ॥ भार्यान्नधनानां लाभस्य विघ्नकरणे प्र
त्येकं संवत्सरव्रतं ॥ यज्ञोपवीतं विना भोजनेन कृछ्रः ॥ अमत्यांबुपाने त्रिप्राणायामः
उपवासो मत्याभोजने ॥ उच्छिष्टे तु मत्याभोजनांबुपानयोरप्येवं ॥ तद्दिनाम
त्यामूत्रादिकरणे तु भक्षणे स्नानं गायत्रीजपः ॥ अकामतएषु क्रमेण त्रिषण्ण
व प्राणायामाः ॥ यस्तु लिष्ट्यनाचांतो भुक्त्वा नास्नातं तः ॥ स द्यः स्नानं प्रकु
र्वीत ॥ अंबुनि स्वप्रतिबिंबदर्शने मायि तेजइति मंत्रं जपेत् ॥ अशुचिद्रव्यस्पर्शे वा
कर्माणि पादचापल्यकरणे कामकृते निष्प्रयोजनानृतवाक्ये च गायत्रीजपः ॥
अकामकृते त्वाचमनं ॥ अत्यल्पे दक्षिणकर्णस्पर्शो जलाभावे वा ॥ शय्यारूढ
पादुकोपानदारोपितपाद उभयोच्छिष्ट अंधकारस्थ अशुद्ध कृछ्रहोमे कृछ्रार्ध

कृतस्नामिपुष्पकुशाग्न्यंबुगंधाक्षतान्नपाणिभैक्षाज्यपाणिदेवपूजानिरतानामभिवादने त्रिरात्रमुपवासः ॥ एतैरन्याभिवादने एषामप्येवमु ॥ आह्निकविच्छेदेपि ॥ बहुदिवसेतद्विच्छेदे द्विगुणं ॥ निमंत्रितस्यान्यत्रभोजने त्रिरात्रं ॥ अकामतस्सकृतं ॥ निमंत्रितस्यभोजनाद्यदाने यतिद्रायणम् ॥ इंद्रधनुः पलाशाग्न्योरन्यस्य प्रदर्शने उपवासो धनुर्दंडश्च दक्षिणा ॥ दंडोत्सर्गे राजेकरात्रमुपवसेत् ॥ त्रिरात्रं पुरोहितः ॥ अदंड्यदंडने कृच्छ्रं पुरोहितस्त्रिरात्रं राजा ॥ पारप्रपातनं कृत्वावृत्वान्हिं तथाल्पयः ॥ कुरोः प्रमृज्य पादौ तु दिनमेकं व्रती भवेत् ॥ भूमिकन्यानृते मासं गोमूत्रयावकपानं ॥ दुःस्वप्नारिष्टदर्शने च सघृतहिरण्यदानं ॥ पलाशकाष्ठनिर्मितशयनासनपादुकाआरुह्य द्विजस्य त्रिरात्रं यावकपानं ॥ विप्रयोर्विप्राग्न्योर्दंपत्योर्गोविप्रयोर्विप्रपिंडयोर्गोबलीवर्दयोर्विप्रगुरुउयोर्मध्यगमने द्विजस्य सांतपनं ॥ वेदाध्ययनहोमसान्नायाद्यंगदोहविवाहकालेष्वेषामंतरागमने चांद्रायणं ॥ कुनखी श्यावदंतौ प्राजापत्यं कृत्वा दंतान्नखांश्चोद्धरेयाताम् ॥ क्षत्रियस्तु रणे पृष्ठं दत्वा प्राणपरायणः संवत्सरव्रतं कुर्यात् ॥ एतदेवफलप्रदवृक्षछेदे ॥ तीर्थयात्राव्यतिरेकेण सिंधुसौवीरसौराष्ट्रांस्तथा प्रत्यंतवासिनः अंगवंगक

॥३६॥

नरणे २

लिंगोद्वान् गत्वा संस्कारमर्हति ॥ एवमंगधदेशेपि ॥ कर्मनाशाजलस्पर्शात्करतोया
लंघनगंडकीबाहुप्लव्यैवं ॥ ॥ अत्रैव प्रसंगात्पुनरुपनयननिर्णयो विशदी
क्रीयते ॥ विनतु नावसंतेन रुक्मपक्षे गलग्रहे ॥ मधुं विनोपनीतस्तु पुनः संस्कार
मर्हतीत्यन्यत्र ज्योतिर्मनुः ॥ अनध्यायोपनीतस्तु पुनः संस्कारमर्हति ॥ गलग्रहे
दोषेच स्वल्पायुरुपजायते इति ॥ अष्टकाच समुद्दिष्टा सप्तम्यादि दिनत्रयं ॥ नाधीयी
त चशास्त्राणि व्रतबंधं च वर्जयेत् ॥ अनध्याये चोपनीतः पुनः संस्कारमर्हतीत्यन्यत्र
अनध्यायशब्देन नित्यानैमित्तिकौ गृह्येते ॥ अविशेषात् ॥ कृष्णे प्रदोषेनध्याये
शनौ निश्यपरार्द्धके ॥ प्राक्संध्यागर्जिते नेष्टो व्रतबंधो गलग्रहे ॥ अनध्यायाः स्मृ
ताभूतत्र्यष्टम्यर्कसंक्रमाः ॥ शुक्के द्वीशार्कदिक्तिथ्यः शुक्रपौषतपः शुचेः ॥ म
न्वाद्याश्च युगाद्याश्च स्मृत्युक्ताः सर्वेह वहीति ज्योतिर्निबंधधृतवचनात् ॥ पुन
रप्यत्र प्राक्संध्यागर्जितं ग्रहणमीदृशानामप्यत्र ग्रहणायावयुत्यानुवादः ॥
यद्वा प्राक्संध्यागर्जितस्य पुनर्ग्रहणं दोषाधिक्याय ॥ तस्याप्यनध्यायत्वात् ॥ यद्वा
नैमित्तिकपुनरुपनयनस्यापि तत्र निषेधार्थमिदं ॥ प्रदोषानिषेधवत् ॥ निमित्ता

नंतरं नैमित्तिकाप्रवृत्तिन्यायेन तत्र तत्प्रसक्तिः ॥ एवं रात्रिनिषेधोपि तत्परः ॥ एतेन च
तुर्दश्यष्टमीपर्वप्रतिपत्स्वेव सर्वदायुर्मेधसामनध्यायस्त्वनत्सगमनेषु चेति हेमा
द्रिधृतवचनेन तदितरेषामनित्यानध्यायत्वसूचनादेष्वनध्यायशब्देन नतदनि
त्यग्रहणं ॥ नित्यतद्ग्रहणे नोपपत्तावनित्यतद्ग्रहणे मानाभावादित्यपास्तं ॥ दुर्मेधा
नामित्युक्त्याऽन्यान्प्रति तेषामप्यनित्यत्वबोधनेन विनिगमनाविरहाच्च ॥ किंचै
वंयुगाद्याद्यनध्यायस्याप्यनित्यत्वेनात्राग्रहणे नैयाचैत्रवैशाखसिता तृतीया
माघे थ सप्तम्यथ फाल्गुनस्य ॥ कृष्णे द्वितीयोपनयने प्रशस्तेति वशिष्ठवाक्य
वैयर्थ्यापत्तिः ॥ तत्र चैत्रशुक्लतृतीया मन्वादिः ॥ वैशाखशुक्ला सा युगादिः ॥
माघशुक्लसप्तमी मन्वादिः ॥ फाल्गुनी पूर्णिमोत्तरद्वितीया चातुर्मास्यद्वितीया ॥
असामनध्यायत्वेपि व्रतबंधे प्रशस्त्यमिति तद्व्याख्यातारः अपिवृत्रयोदश्या
दिचतुष्कं सप्तम्यादि दिनत्रयं ॥ चतुर्थी चैव संप्रोक्ता नष्टावेते गलग्र
हाः स्मृताः ॥ चतुर्दश्यष्टमीपर्वप्रतिपदां गलग्रहत्वादेव निषेधे सिद्धे प्र
दोषे नित्यनध्याये इति वचनेनध्यायग्रहणवैयर्थ्यापत्तिः ॥ एवं च ग

र्जोघनध्यायेषुउपनीतस्याकालेकृतंमेवेतिब्राह्मणत्वासंपत्त्याऽपू
र्वोपनयनविधिनापुनरप्युपनयनंकार्यमितिसिद्धम्॥ यत्त्वाश्वलायन
सूत्रेऽथोपेतपूर्वस्येत्यादिनापुनरुपनयनमुक्तंतस्यनप्रवृत्तेप्रवृत्तिः॥
उपनेतपूर्वत्वाभावात्॥ याप्रायश्चित्तत्वेनपुनरुपनयनप्राप्तावेवंकु
र्यादितितत्सूत्रव्याख्यानेवृत्तिकृतोक्तत्वात्॥ तथैवजयंतोक्तेश्च॥ ए
एतेननैमित्तिकमनध्यायंकृष्णेचप्रतिपद्दिनं॥ मेखलाबंधनेशस्तंचो
लेवेदव्रतेष्वपीतिवसिष्ठवचनाऽर्जोघनध्यायेनदोषइतिपरास्तम्॥
तस्यकालातिक्रमविषयत्वात्॥ प्रशस्ताप्रतिपत्कृष्णेकदाचिच्छुभ
गेरवौ। चंद्रेबलयुतेलग्नेवर्षामतिलंघनेइतिव्यासवचनैकवाक्यत्वात्
प्रशस्ताप्रतिपत्का॥ यत्त्वेतद्बलान्नैमित्तिकानामनध्यायत्वंवेदाध्यय
नमात्रविषयत्वमिति॥ तन्न॥ कृष्णेप्रदोषेइत्यादिप्राग्लिखितवचनेन

स्मै स्मृत्युक्ताः सर्व एव हीत्यनेन च विरोधापत्तेः । गर्जाद्यनध्याया याज्ञ
वल्क्यादिभिरुक्ताः ॥ तत्र याज्ञवल्क्यः ॥ त्र्यहं प्रेतेष्वनध्यायः शिष्य
र्त्विग्गुरुबंधुषु उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा । संध्या
गर्जितनिर्घातभूकंपोल्कानिपातनो समाप्य वेदं द्युनिशामारण्यकमधी
त्य चेति ॥ इदमकालविषयं ॥ धर्मप्रश्ने । विद्युत्स्तनयित्नुवृष्टिश्चाप
तौ यत्र सन्निपतेयुस्त्र्यहमनध्यायो यावद्भूमिर्व्युदके त्येक इति ॥ एत
त्संध्याकालातिरिक्तविषयां एवं च महाव्रतप्रकणस्थे ऐतरेयब्राह्म
णेऽपर्तौ वर्षे त्रिरात्रमित्यत्र वर्षं विद्युद्गर्जयोरुपलक्षणं ॥ अत्र श्रुति
भाष्ये पर्तुशब्देन श्रावणभाद्रातिरिक्तः काल इति माधवः तच्छत्रि
न्यायेन बोध्यम् ॥ अनुराधर्क्षमारभ्यषोजश्रार्क्षेषु भास्करः ॥ याव
च्चरति वै तावदकालं मुनयो विदुः । इति रत्नावलीधृतवचनात् । हर

दत्तस्तु उज्ज्वलायां यत्र देशे यो वर्षाकालस्ततोन्यत्रापर्तुरित्याह ॥ तद्बल्लाब
लीधृतवचनविरुद्धम् ॥ वयं तु पौषादिचतुरो मासानूजातावस्थिरकाल
जा ॥ व्रतं यात्रां विवाहं च वर्जयेत्सत्यवासरान् इति तत्तु यात्राविवाहसाह
चर्यात्मव्रतेपि दृष्टदोषबोधकं ॥ ब्राह्मण्यानुत्पादकदोषस्तुदिदित्युक्तं ॥
तत्तु संध्याकानत्रयमेवेति बोध्यं ॥ यत्तु विद्युत्स्तनितवर्षेषु महोल्कानां
च संप्लवे आकालिकमनध्यायमेतेषु मनुरब्रवी+ लातिरिक्तका
लेऐके कोपजने बोध्यं ॥ परेद्युर्यावत्स कालमाकालं तत्र भव आकालि
कः ॥ संप्लवोऽसकृदुपजनः ॥ सायंसंध्यास्तनितेहोरात्रमिति हारी
तोक्तं तु ऋतुविषयम् ॥ यत्तु लल्लेन वसिष्ठनाम्नोदाहृतं वचनं व तेह्निपू
र्वसंध्यायां वा रिद्रो यदि गर्जति ॥ तद्दिनेस्यादनध्यायो व्रतं तत्र विवर्जये
दिति तदपि समूलत्वेकालिकगर्जविषयं ॥ हारीतेकवाक्यत्वात् ॥ २२

द्विवैश्यस्योपनयनविधानेनतद्विषयेपूर्वोक्तस्यैवनिषेधस्यानुवादः ॥ तत्रका
लेवृष्टौयथानध्यायाभावस्तथैतद्विषयेपीतिशंकावारणार्थश्चुसइत्येकेसा
मान्यतस्तद्दिनएवानध्यायोनतुत्र्यहमित्येवंपरिसंख्यायाज्ञवल्क्येनवि यां
रोधः ॥ ऋतुविषयेत्वधिकामासेव्यर्थतैववचनस्यापततीति ॥ अतविवर्जनेऽ
नध्यायत्वमेवनिमित्तमतस्तदुक्तिः ॥ अतंतत्रैववर्जयेदितिनियमेचतुर्द
श्यादौतद्दापत्तिः ॥ नैमित्तिकानध्यायेषुपूर्वैसंध्यागर्जएवतत्रापितद्दिन
एवेतिनियमेतत्रगर्जादिसन्निपातेउपनयनापत्तिः ॥ किंचैवंद्वेधापरिसं
ख्याकल्पनापेक्षयामहानाम्न्यादिव्रतविषयत्वमस्यवक्तुमुचितम् ॥
नैमित्तिकमनध्यायमित्यादिप्राग्लिखितवसिष्ठवचनेनवेदव्रतेषुकाला
तिक्रमेतदनुज्ञयातदनतिक्रमेतेष्वेषांसाज्यत्वप्रतीतेः प्रतिपदन्महाव्रा
वृतप्रकरणीयैतरेयब्राह्मणाच्चेत्यन्ये ॥ एतेनमध्यदेशेमाघेनियतवृष्टि
स्यत्वेनतस्यापिकालत्वेनसंध्यागर्जादौतद्देशेनानध्यायइतिनिरस्तम् ॥

कालगर्जादावपि दिनमात्रमनध्यायस्य सत्वाच्च ॥ यत्तु गांडीवमेतत्पार्थ
स्यकौ लोकेषु विदितेधनुः ॥ एतद्वर्षसहस्रंतु ब्रह्मा पूर्वमधारयत् इत्युप
क्रम्य पार्थः पंचचषष्टिंचवर्षाणि श्वेतवाहन इति भुपक्षा वैमासा इति श्रु
त्यनुसारेण षट्सु मासेषु वर्षव्यवहाराभानुपपन्नमिति न तदेकवर्षम
ध्ये द्वौ वर्षौ कालावित्यत्र गमकम् ॥ यत्तु ज्योतिर्निबंधे नांदीश्राद्धे कृते चे
स्यादनध्यायस्त्वकालिकः तदोपनयनं कार्यं वेदारंभं विवर्जयेदित्यु
क्तं तन्न वक्ष्यच विषयं ॥ तेषामुपनयनदिने वेदारंभाभावेन निषेधासंभवा
त् ॥ तदर्थस्तु नांदीश्राद्धे कृते यद्यकालभवोनध्यायः स्यात्तदोपनय
नं कार्यं वेदारंभस्तु वर्ज्य इति बहवः प्रामाणिकाः विषयस्तोभिस्तां यत्तु
कार्यमित्यंतं सर्वसाधारणं ॥ निषेधस्तु संभवत्सास्तिकविषय इति तन्ना
सन्नियोगशिष्टन्यायेनोभयोरेकत्र । वाक्यभेदापत्तेश्च । वेदारंभातिरि
क्तांगकमुपनयनं कार्यमित्येकवाक्यतोचितास्यात् ॥ वेदारंभंतु वर्जयेदि

त्तिपाठे तथार्थासंभवाच्चेति दिक् ॥ उपनयनोत्तरं ब्रह्मौदनपाकात्पूर्वं ग
र्जितादिसंभावनायां द्विवेवचरुश्रपणं कृत्वास्तमिते होमः कार्यः ॥ न
संध्यागर्जिते काले नवचस्पुसातदूषिते ब्रह्मौदनपचेदग्नौपकं चेन्न
निवर्त्तत इति संग्रहोक्तेः ॥ पक्वमन्नं तदुष्यतीति पाठांतरं ॥ चरुश्रपणा
त्पूर्वमेव संध्यागर्जादोपुनरुपनयनमेवेति केचित् ॥ अन्ये तु औत्पत्ति
कमनध्यायं प्राक् ब्रह्मौदनपाकतः ॥ व्रतादूर्ध्वं नेष्टमाहुर्न्शांस्याहेष्टं
पराशर इति ज्योतिःशास्त्रोक्तेः ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितं य
दि ॥ तदा विघ्नकरं त्वेयं बटोरध्ययनस्य तत् ॥ तत्र शांतिविधानं तु वक्ष्ये
शांस्त्रोक्तेः ब्रह्मो शाखानुसारतः इत्यादिना शांतिमुक्त्वा ततो ब्रह्मौदनं पचे
ति विधानमालोक्य शांतिं कृत्वा पाकः कार्यः ॥ शांतिमकृत्वा तत्कर
णे तु पुनरुपनयेनेनं ॥ वस्तुतः शांतिरध्ययनविघ्नादिदृष्टदोषनिवारणाय ॥
पुनरुपनयनं तु ब्रह्मण्यानुसाराद्भवत्येवेत्याहुः ॥ नीलीवस्त्रादिधारणे

२०

केशगर्भितधारणे चोपवासः पंचगव्यपानं हिरण्योदकपाने च परेषु॥
नीलीमध्यगमने त्रयः प्राणायामाः स्नात्वा। नीलिजदंतधावने वस्त्र
धारणवत्॥ रोमकूपेषु नीलीरजःपतने तु वर्णत्रयस्यापि तत्यं कृच्छ्रम्॥
नीलीं विक्री।णन्यालयन्त द्धस्याजीवश्च पतति॥ विरक्तश्चेत्त्रिभिः कृ
च्छ्रैः शुध्येत्॥ नीलीक्षेत्रोत्पन्नभुक्तौ चांद्रं॥ नीलीमज्ञानतो जग्ध्वाप्येवं॥
नीलीक्षेत्रे नीलीमुत्साद्य द्वादशाब्दात्परं शुध्येत्॥ नीलीं धृत्वा मैथुने उत्प
न्नगर्भश्चांडालो भवति॥ नीलीं धृत्वा मृतः षष्टिवर्षाणि विष्ठायां कृमिर्भ
वति॥ विधवया तीलीधारणे तद्भर्तुर्नरकः॥ नीलीधारणपूर्वं दाने दातुर्भो
क्तुश्च सांतपनं॥ नीलीदारुभेदेन रुधिरदर्शने चांद्रायणम्॥ स्त्रीणां माक्री
डार्थं भोगे शयनीये न दुष्यति स्त्रीधृता शयने नीली ब्राह्मणस्य न दुष्यति कं
बलेपटसूत्रे च नीलीरागो न दुष्यतीति वचसः॥ अपांक्तेयपंक्तिभोजने उ

पवासः परेद्युः पंचगव्यंच ॥ प्रत्यर्कादिमेहने आत्मनः शकृद्दर्शनेच सूर्ये
विप्रं गांच पश्येत् ॥ क्षत्रियवैश्ययोरभिवादने विप्रस्योपवासः ॥ शूद्राभिवा
दने त्रिरात्रं ॥ गृहस्थस्यानापदि सिद्धान्नभिक्षाकरणे दशरात्रं ॥ वज्रकृच्छ्रं
संवंधिद्रव्यपानां ॥ आपदि त्र्यहम् ॥ देवगुर्वाद्याभिमुखेन ष्ठीवने जीवनावि
रोधेन जिह्वां दहेत् हिरण्यंच दद्यात् ॥ इदमभ्यासे ॥ वापीकूपतडागारामसे
तुवप्रदेवतायतनप्रतिमाभेदे प्राजापत्यमकामतः सकृत्करणे ॥ प्रतिमा
चाश्ममृन्मयीपूजितोज्झिता च ॥ दारिद्र्यक्रोधमात्सर्यादिभिर्भर्तुरतिक्र
मेतिकृच्छ्रः ॥ पर्वणि मैथुने सचैलस्नानं ॥ वारुणीभिर्मार्जनं मंत्रं च ॥ आर्द्रदि
ने मैथुने उपवास एव ॥ स्खलने परे रजस्वलायां गत्वोपवासत्रयपूर्वकं चतु
र्थे घृतप्राशनम् ॥ कामतश्चेत् सप्तरात्रमुपवासः ॥ अकामतोभ्यासे कार्यं ॥
कमतोभ्यासे तिकृच्छ्रः ॥ कामतो संतानवाञ्छिभ्याम्भ्यासेन वमासिकं व्रतं ॥ अ
त्रैवार्षिकमिति स्मृत्यर्थसारे ॥ प्रथमे न्हि पराकः द्वितीये सांतपनं तृती

ये प्राजापत्यम् ॥ अकामतः प्रवृत्तस्य रेतःसेकात्स्याद्भि वृत्तस्य सचैलं स्नानं महाव्याहृतिहोमश्चाषण्मासोऽन्तरं गर्भिणीगमनेऽप्येवं ॥ यदि तु स्त्रीसंभोगमंतरेणाप्यकामतो हृटाच्च रमधातुविसर्गस्तदा स्कन्नं रेतो यन्मेघुरेतः पृथिवीं पुनर्मामेत्वित्यभिमंत्र्य तेन रेतसा स्तनयोर्भ्रुवोर्मध्यमुपकनिष्ठिकया स्पृशेत् ॥ कामतः प्राणायामत्रयसहितसहस्रगायत्रीजपः । वनियत्स्यो स्कन्चांद्रायणत्रयम् ॥ गृहस्थस्य यत्नपूर्वं च रमधातुविसर्गे वारुणीभिर्मार्जनमित्यपि कश्चित् ॥ स्वप्ने तु त्रिर्नमस्कारः सूर्यस्य गृहस्थेन कार्यः ॥ तयोस्त्वघमर्षणत्रयं ॥ ब्रह्मचारिणस्तु स्वप्ने रेतस्स्खलने स्नात्वार्कं संपूज्य त्रिः पुनर्मामित्यृचं जपेत् ॥ भये रोगे स्वप्ने च गृहस्थादीनां स्खलने सूर्यार्चनादि पूर्ववत् ॥ नैष्ठिकब्रह्मचारिणस्तद्द्विगुणं ॥ वमने पंचगव्यपानं ॥ मासमाषमसूरवमनेदुपवासत्रयं प्राणायामत्रयपूर्वकं स्नानं घृतप्राशनं च ॥ दिवास्वप्ननग्नस्त्रीदर्शननग्नस्वापश्मशानाक्रमणहयारोहणपूज्यपूजातिक्रमाजीर्णश्मश्रुकर्मदुर्जनस्पर्शेषु स्नानं कामतो नक्तभोजनं ॥ गर्भाधानादिचूडाकरणांतसंस्कारेष्वेकैकलोपे

पादकृछ्रः ॥ चूडाया अर्धकृछ्रः ॥ अनापदि द्विगुणं ॥ प्रायश्चित्तोत्त
रं तत्संस्कारकरणं च ॥ गर्भाधानमात्राकरणे गोदानपूर्वकं पुंसवना
चरणं ॥ संवत्सरे नित्यक्रियातिपाते तु षष्ठि प्राजापत्यानि ॥ आक्रो
शानृतवदनयोरेकस्त्रमो वोपवासाः ॥ कामतोभ्यासे तस्य कृछ्रम् ॥
निषिद्धकाष्ठदंतधावने गोदर्शनं ॥ गृहीतस्य व्रतस्य प्रमादाद्विनाभंगे
उपवासत्रयम् ॥ पुनर्व्रतग्रहणं च ॥ विप्रस्यापद्दिवर्षपर्यंतं क्षत्रवृत्याध
नार्जने चांद्रायणं वैश्यवृत्तौ षण्मासात् ॥ शूद्रवृत्तौ तु सकृदेव पुनरूप
नयनसहितं कृछ्रं ॥ शूद्रस्य द्विजकर्मकरणे प्येतत् ॥ तद्धनत्यागोत्तरमे
व प्रायश्चित्तं ॥ स्त्रीधनोपजीवने स्त्रीये तद्धनं दत्वा चांद्रायणम् ॥ भा
र्यायामुखमैथुने कृछ्रम् ॥ गोयुक्तयानस्थस्य मैथुने तदर्धम् ॥ अ
कामतोनभ्यासे स्नानमात्रम् ॥ वस्तिकर्मणि प्रच्छर्दनविरेचनयोरभ्या
से शिशुकृछ्रः ॥ अन्यत्र स्नानं ॥ देवागारशिलादिनास्वगृहकरणे कृ
छ्रं ॥ गुरुस्मृतिश्रुतवस्त्वकरणे तस्य कृछ्रसहितं चांद्रायणं ॥ भोजन

कालेपरिगृहीतमौनत्यागे तदभ्यस्यागः ॥ अर्थभुक्तेन्नपात्रेण जलपाने
पशुवन्मुखेन जलपाने चोपवासः ॥ दृष्टाप्रतो दिशुभाशुभमहाकर्म
णि ऋत्विगाचार्यादीनां ध्याद्वत्राव्यष्ट्या सदर्थे वा सर्वप्रायश्चित्तम् ॥ श्राद्धो
पवासादिनिषिद्धदिनेषु दंतधावने गायत्र्याशतसंपूतां जलपाने ॥ कन्या
या विवाहात्पूर्वं रजोदर्शने तत्पिता तद्दतूनगणयित्वा तत्संख्या गोदानं कृ
त्वाऽशक्तावेकां स्वर्णशृंगादिगोदानविधिना दत्त्वा तत्राप्यशक्तौ सदक्षि
णमन्नं विप्रेषु दत्त्वा त्रिदिनमुपोषितां च तुर्थरात्रौ गव्यपयोमात्राहारां
कन्यां निवृत्तरजसं भूषितां दद्यात् ॥ तदुद्वोढा कूष्मांड मंत्रैर्घृतं जुहुयात् ॥
विवाहहोमकाले उपस्थिते मारब्धे विवाहे रजोदर्शने तु स्नापयित्वा तां
युंजानेति तैत्तिरीय मंत्रेण कृत्वा विवाहं प्रवर्तयेत् ॥ सुरापस्य गंधमाघ्रा
य सोमपो ब्राह्मणोऽप्सु निमग्नस्त्रीन्प्राणायामानभ्रेरघमर्षणजपं वा कृ
त्वा घृतमाशानं कुर्यात् ॥ असोमपोनप्सु ॥ इतरस्या मंत्रकं प्राणायामः ॥
मद्यपगंधेतत्तदर्धं ॥ सोक्षात्सुराघ्राणे सुरापानवत् ॥ अमत्याघ्राणेमा

णायामास्त्रयः ॥ मद्यविण्मूत्रक्केस्रासूतिगंधानामन्यतमघ्राणे त्रिः
प्राणायामाः । दर्शनेपि । स्पर्शने स्नानं घृतप्राशनं च ॥ सुरापस्पर्शे स्नाने
पंचगव्यं च । शवघ्राणेसु त्रिः प्राणायामाः असोमपस्यानस्तु । इतरस्य
मंत्रकम् ॥ मद्यविण्मूत्रादिभिः संस्पृष्टे मुखमंडले मृत्तिकागोमयैः प्र
क्षाल्य पंचगव्यं पिबेत् ॥ मदिरां दृत्तै स्पृष्ट्वा प्रतिगृस्य च स्नात्वा कुशां
बुत्र्यहं ॥ संक्रात्यादिनिमित्तेष्वस्नात्वा भोजने ऽष्टसहस्रं गायत्रीजपः ॥
शूद्रादिस्पर्शनिमित्ते तूपवासः ॥ चंडालादिस्पर्शनिमित्ते तु कामं त्रिरा
त्रं वा ॥ मत्या चैकं ॥ सकृद्दृष्टे सहस्रं गायत्रीजपः । कामकृते सहस्रं त्र्यहम् ॥ त्र
पाने त्वेक उपवासः ॥ कामाभ्यासे रजकादिस्पर्शनिमित्ते तदर्धम् ॥ त
त्स्पृष्टे स्पर्शनिमित्ते तूपवासः त्रिरात्रं वा ॥ नित्यस्नानमकृत्वा भुक्त्वा उ
पवासस्त्रिरात्रं वा । नैमित्तिके ऽस्नाने सर्वत्राष्टसहस्रं जपो दश प्राणा
यामाश्च ॥ अमेध्याद्यस्पृश्यस्पर्शने ऽस्नात्वा भुक्ते गृहस्थादेस्त्रिरात्रम
त्याष्टरात्रं ॥ यतिनः कायं चांद्रं वा ॥ श्वपाकादिस्पर्शनिमित्ते मत्या त्रिरात्रं ॥

हस्तस्थापितकवलादिभोजने । ब्राह्मणसमीपभोजने दुष्टपंक्तौ च भोजने वा
लांस्त्यक्त्वा भोजनेरुद्धहस्तेन भोजने पानीयपाने चामसानक्तं ॥ मत्यातूप
वासः पंचगव्यं वा ॥ असनारूढपादे वा वस्त्रार्धप्रावृतोपि वा ॥ सुखेन धमितं
भुक्त्वा कुर्यात्सांतपनव्रतं ॥ अनाचम्य भक्षणेष्टशतजपः । भोजने तूपवासः
आपोशानं विनाथेवं । अभ्यासे सहस्रगायत्रीजपः । भोजनकाले पंचग्रास
ग्रहणसमये मौनाकरणेष्टोत्तरशतगायत्रीजपः ॥ यज्ञोपवीतं विना भोजने
उपवासः शतं जपो गायत्र्याः स्नानं च ॥ भोक्तुकामस्यापोशानात्पश्चादभ्य
वहारात्पूर्वं मूत्रपुरीषगमने सचैलो बहिराप्लवः षट्प्राणायामाश्च । भुंजा
नस्य गुदस्रावे शौचं कृत्वा स्नात्वोपोष्य पंचगव्यं । भुंजानस्याशुचित्वे तं ग्रासं
भूमौ निधाय स्नायात् ॥ तदश्नने तूपवासः ॥ सर्वाभाशने त्रिरात्रम् ॥ भुंजा
नस्य मस्तके विष्ठादिपतने त्वन्नं त्यक्त्वा नद्यां स्नात्वा त्रिः प्राणायामाः । आसना
रूढपादेन कृतान्नस्य भोजने वस्त्रैकदेशाकृतान्नस्य भोजने सुखेन धमितान्ना
द्यस्य भोजने सांतपनं । भार्यया सोदरैर्वा सह भोजने दिवसमात्रमभोजनं ॥

ज्ञातिभिः सहभोजने त्वहोरात्रंत्रं ।। शूद्रहस्ते योऽश्नीयात्पानीयं वापि वेत
स्योपवासपूर्वकं पंचगव्यपानोक्ततुभूमौ भोजने होरात्रं यावकाहारता पंचग
व्यपानं च ।। पूर्वदिन भुक्तस्य वमने होरात्रोपवासः पंचगव्यपानं च ।। घृतहीनाहु
तिपंचका भोजनोत्तरं स घृत भोजनात्स्यं ताभ्यासे चांद्रायणं ।। चंडालश्वपच
क्षत्तसूतवैदेहकमागधायोगवाश्चांडालाद्याः ।। विप्रायां शूद्राज्जात आ
द्यः। क्षत्तुरुग्र्यां जातः श्वपचः ।। क्षत्रियायां शूद्राज्जातः क्षत्ता। राजन्या
च्छूद्र्यामुत्पन्नोग्री। विप्रायां वैश्याज्जातः सूतः। विप्रायां क्षत्रियाज्जा
तो वैदेहकः। क्षत्रियायां वैश्याज्जातो मागधः। वैश्यायां शूद्राज्जात आ
योगवः ।। शौंजिकादयश्च। कापालिकनिजकघालुकलुध्वकांत्यजाः।
अंत्यजाश्चर्मकाररजकनटबुरुडकैवर्तमेदभिल्लाः सप्त। सूतिकासू
यिकारजस्वलापतितशवबाहकघंटदेवलकविसृष्टाग्निकारूढपति
ताभिश्चास्ता अंत्यजवत् ।। श्वविड्वराहखरोष्ट्रश्वापदाद्याः श्वादयः। एषा
मेवं पंचमा इति संज्ञा। गोमांसभक्षको यस्तु विरुद्धं बहु भाषते ।। सर्वाचार
विहीनश्च म्लेंछ इत्यभिधीयते ।। स एव यवनदेशोद्भवो यवनः। तत्र भु

क्तिसमयेश्वचांडालांत्यजादिदर्शनेआचमनपूर्वकंप्राणयामत्रयंभोजन
त्यागेसति॥ तदत्यागेतूपवासः पंचगव्यंवा। मूत्रोत्सर्गवेलायांभोजनेपा
नेवोपवासोव्याहृतिभिः सर्पिषाऽष्टोत्तरशतहोमः। कांजिकादिनाशौ
चंकृत्वाभोजनेपुनर्जलेनशुद्धिंकृत्वोपोष्यपंचगव्यंपिबेत्॥ एकपंक्त्यां
तुभुंजानोविप्रोविप्रंयद्यास्पृशेत्तु शिष्टंतदन्नंभुक्त्वैवगायत्र्यष्टशतंज
पेत् शिष्टंपात्रस्थितं॥ तदुत्तरंभुक्तेर्विरामः॥ भोजनोत्तरमुच्छिष्टयोःस्प
र्शेउभयोरपिस्नानंशतजपोवा॥ तादृशक्षत्रियविट्स्पर्शेक्रमेणनक्तो
पवासौनक्तेघृतप्राशनमेव। स्नानंजपश्चेतिस्मृत्यर्थसारे। भोजनोत्तरमे
तयोःस्पर्शेउपवासउपवासोवा॥ भुक्तोच्छिष्टशूद्रादिस्पर्शेतुउपोष्य
परेद्युर्नक्तंतत्परेद्युःपंचगव्यपानं। भुक्त्वानाचमनेपीदं। एवंश्वस्पर्शेपि॥
इदंकामतः। अकामतस्स्नानंसहस्रगायत्रीजपश्च। भुक्तोच्छिष्टाना
चांतस्यामेध्यमूत्रादिस्पर्शेपंचगव्यपानं॥ उच्छिष्टस्यचांडालादिस्पर्शे

त्रिरात्रं त्र्यह उपवासाः ॥ अष्टाधिकसहस्रगायत्रीजपश्चतुर्थे पंचगव्यं च मिलित्वा
पादोनप्राजापत्यं ॥ ज्ञात्वा बलात्स्पर्शे द्विगुणं पूर्णमेव प्राजापत्यं ॥ ज्ञात्वा द्विगु
णमित्यन्ये ॥ अनुच्छिष्टस्य यत्स्पर्शे स्नानं भुक्त्वोच्छिष्टस्य तत्स्पर्शे प्राजा
पत्यमित्याहुः रजकचर्मकारवेनधीवरनटस्पृष्टस्य तस्यैकरात्रं पयःपानं ॥
त उच्छिष्टस्पर्शे तु त्रिरात्रं घृतप्राशनं ॥ भुंजानस्य रजस्वलास्पर्शे शिशुकृ
च्छ्रः प्राणायामशतं च ॥ अमत्या त्र्यहं ॥ मूत्राद्युत्सर्गोत्तरमकृतशौचस्या
धरोच्छिष्टस्य विप्रस्य चांडालादिस्पर्शे रात्रावभोजनपूर्वकं पंचगव्यपानं ॥
तस्य रजस्वलास्पर्शे उपवास एकः ॥ महापातकिसंस्पर्शे स्नानमेव विधीयते ॥
संस्पृष्टस्पर्शे ब्रह्मकूर्चं ॥ समुच्छिष्टस्तु यो भुंक्ते यो भुंक्ते मुक्तभोजनः ॥ एवं वैव
स्वतप्राह भुक्त्वा सांतपनं चरेन्ना भूयोभ्यास एतत् ॥ सूतिकादितत्स्पृष्टभांडस्य
भोजने त्रिरात्राच्छुद्धिः ॥ कुक्षिकुनख्यादिस्पृष्टभोजनाभ्यासे कृच्छ्रं ॥ तैलाभ्यक्तस्त
थावांतश्श्मश्रुकर्मणि मैथुने ॥ मूत्रोच्चारं प्रकुर्याच्चेत्त्रिरात्रेणैव शुध्यति ॥ दीपोच्छि
ष्टाभ्यंगोच्छिष्टरात्रौ रथ्याहृततैलभोजनेप्येवं ॥ अमत्या एक उपवासः ॥ उच्छि ८

ष्टस्य तत्करणेप्येवं। अशक्तौ नक्तम्॥ पीतावशिष्टमुखनिर्गततोयपानेमस्या
भ्यासे चांद्रं पराको वा॥ पीतावशिष्टमात्रांबुपाने वामहस्तेन वा पाने तदर्धं॥
भुक्तोच्छिष्टस्यानाचांतस्य निंदिताभ्यादननम्रकरणे कांस्यजशौंडिकादी
वीनां ज्ञानतः। स्पर्शे प्राजापत्यं॥ अर्धोच्छिष्टपादः। येनास्ये ग्रासः क्षिप्तो न
निगीर्णरसोर्धोच्छिष्टः॥ आचमाव्यवहितोत्तरमप्येतदेव॥ मूत्रादिकाले
स्यजादिस्पर्शे दिनमेकं चरेन्मूत्रे पुरीषे च दिनद्वयं। दिनत्रयं मैथुने च पाने स्या
त्तुचतुष्टयं॥ एवं रजस्वला श्वशूकररासभमद्यभांडादिस्पर्शेपि। चांडालादिस्प
र्शेप्यध्यर्धमेतदेव॥ द्विगुणमित्यन्ये॥ चांडालाद्युदकस्पर्शे स्नानं उच्छिष्टस्य
तत्स्पर्शे त्रिरात्रं॥ वक्ष्यमाणस्य यदि विप्रश्चांडालो प्रेक्ष्यतस्तर्हि सचैलस्नानु
मुपवासः पंचगव्यपानं च॥ अंत्यजाद्यावर्धम्॥ उच्छिष्टस्य रजकादिस्पर्शे एक
रात्रपयः पानं॥ तस्योच्छिष्टतत्स्पर्शे त्रिरात्रं घृतप्राशनं॥ केचित्त्वधरोच्छि
ष्टस्य चांडालादिस्पर्शे एकउपवासः पंचगव्यपानं च॥ श्वशूकरमद्यभांडमा

र्जारकाककुक्कुटश्ववराहस्पर्शे उच्छिष्टः सांतपनं कुर्यात्॥ एतत्कामतो
भ्यासे अन्यत्राहोरात्रोपवासपूर्वकं पंचगव्यपानं॥ अकामतस्तु स्नानपूर्व
कं सहस्रगायत्रीजपः॥ ऊर्ध्वोच्छिष्टार्धमधरोच्छिष्टे॥ हस्तकाष्ठेन वा
ससा वा स्वजस्पर्शे गं प्रक्षाल्याचामेत्। उच्छिष्टस्य तथा स्पर्शे रात्रावभो
जनम्। अधरोच्छिष्टस्य श्वकाककंकगृध्रनराहीनां विष्ठास्पर्शे सचेलं
स्नानं। ऊर्ध्वोच्छिष्टस्यैकोपवासपूर्वकं पंचगव्यपानं॥ उच्छिष्टस्य सव
र्णोच्छिष्टस्पृष्टस्य पुनः श्वशूद्रस्पर्शे एकोपवासपूर्वकं पंचगव्यपानमित्या
हुः॥ अज्ञानात्सच्छूद्रोच्छिष्टभोजने त्रिरात्रमभोजनं चतुर्थे पंचगव्यपानम्॥
एतदेव स्त्र्युच्छिष्टभोजनेपि। क्षत्रियाद्युच्छिष्टभोजने पादपादहानिः॥ उच्छि
ष्टमन्नं तद्भोजनोत्तरं पाकपात्रेवशिष्टम्॥ शूद्रच्छिन्नयज्ञोपवीतो ब्राह्मणो मं
त्रेणान्यत्परिधायोपवसन्गायत्रीशतं जपेत्॥ स्नानं शुध्यति॥ तोद्विगुणं॥ एव
मन्यत्रापि अनादेशे शतं गायत्रीजपः॥ विप्रेण छिन्नयज्ञोपवीतो विप्रो मंत्रा
न्यत्परिधाय मनस्तापेन ज्ञानतस्तु उपवास एव॥ चंडालादिछिन्नयज्ञोपवी

तेमहासांतपनद्वयं ।। अब्राह्मणसमीपभोजने दुष्टपंक्तिभोजने पंक्त्यग्रभोजने
भुक्त्वा मूत्रपुरीषकरणे शूद्रैः स्वापे सांतपनं । कामतोभ्यास एतत् ।। भग्नकांस्य
पात्रभोजने सुवर्णोदकस्पृष्टघृतप्राशनमाहारांतरेभिव्यक्तिश्च ।। चांडाल
पुल्कसम्लेछभिल्लपारसीकमहापातकिबौद्धशैवपाशुपतलोकायतिक
नास्तिकव्यंगोन्मत्तांत्यजविकर्मस्थद्विजोदक्यासूतिकासूयिकापतितश
वशावस्पृष्टियूपचैत्यमृतहारककापालिकवनमार्जारस्पर्शे सचैलं सशि
रस्नानमकामतः ।। कामतस्त्वें स्त्वग्निस्पर्शो घृतप्राशनेधिके ।। अत्र शैव
पाशुपतौ वेदविरुद्धतदागमोक्तानुष्ठातारौ लोकायतिकः साहचर्यादि
तिवहवः ।। रजकचर्मकारव्याधवैवर्तमृगयुशौनशाकुनिकनटधीवर
जालोपजीविनिर्णेजकसोभिकटकशैलूषमुखेभगसर्ववर्णगवनितचु
क्रिध्वजैवध्याघातिश्वग्राम्यसूकरकुक्कुटैः ।। शिरोव्यतिरिक्तांगस्पर्शे
तदंगक्षालनपूर्वकमाचमनं । शिरस्पर्शे स्नानं । कामतस्स्पर्शे द्वादश

वारंमद्भिः शोधनमधिकम्॥ सर्वत्रातुरस्याचमनमेव। चंडालादिभिरातुरस्पर्शेप्येतत्॥ शूद्रनिषादस्पर्शे आचमनं हीनशूद्रस्पर्शे स्नानं॥ प्रागुक्तचंडालादिभिर्व्यवहिते स्पर्शे सचैलं स्नानं॥ एवं मतिपूर्वके सचैलमन्यत्राचैलमिति बोध्यं॥ काष्टतद्वस्त्रादिद्वारेण तत्स्पर्शे यदंगे स्पर्शस्तदंगक्षालनमाचमनं च॥ नौसंक्रमादौ स्पर्शे न दोषः। चेतनव्यवधाने न स्पर्शे स्नानं॥ अशुचिलशुनादिस्पष्टिस्पर्शने नैदोषः एकशाखारोहणे त्वचेतनव्यवधानेपि स्नानं॥ वचनात्। चिरकालं चंडालादिछायारोहणे स्नानं घृतप्राशश्च तत्कालं घनेप्येवं। सर्वांगावच्छेदेन चंडालादिस्पर्शे त्रिरात्रमुपवासः चंडालादिभिरेकशाखारोहणे विप्रस्य सवासस्स्नानं कामतोऽष्टशतजपश्च॥ अभ्यासे तूपवासपूर्वकं पंचगव्यपानं॥ एकपाषाणाद्यारोहणे शाखावत्॥ चंडालादिस्पर्शे रात्रावपि स्नानं तच्च दिवोद्धृतजलेनाग्निसन्निधौ स्वर्णं जले प्रक्षिप्य कार्यम्॥ चंडालशवस्पर्शे कृच्छ्रम्॥ चंडालादिभिर्यानशय्यासनादौ त्रिरात्रं। विप्रेण चांडालस्य व्रणबंधनाभ्यंजनरुधिरोत्सारणादौ विप्रस्य प्राजापत्यं। चंडालेन विप्रस्ये

घ्रपिएवम्॥अनभ्यासेत्रिरात्रम्॥अभ्यक्तस्यचांडालादिस्पर्शेएकोपवासपू
र्वकंपंचगव्यपानं॥चंडालस्योच्छिष्टदर्शनेतक्रतुदर्शनेतत्स्पर्शनेतद्गीतश्र
वणेभैषज्यक्रियायांचद्विरुपवासः॥चंडालादिदर्शनेरविदर्शनपूर्वकंपंचदश
प्राणायामा।अभ्यासेकामतश्च।अन्यथारविदर्शनमेव॥एतैःसंभाषणेअष्टो
त्तरशतगायत्रीजपः॥अज्ञानतोविप्रसंभाषणं।चंडालाद्युपदेशेप्राजापत्यं।
चंडालकूपतीर्थनिषेवणेत्रिरात्रं॥चंडालेनैकपथगमनेगायत्रीस्मरणमल्प
कालसाध्ये।अन्यथासचैलस्नानम्॥चंडालस्पष्टकांस्येभोजनेकृच्छ्रम्॥
जलपानेतुपादकृच्छ्रम्॥चंडालादेःस्ववेश्मन्यवस्थानेत्र्यहंदधिसर्पिःपयो
भिस्त्र्यहगोमूत्रयावकपानंत्रिसंध्यमवगाहनं॥ततस्त्र्यहंदुग्धाततस्त्र्यहंपय
सा।पलत्रयंदधिपयसोःसर्पिषःपलं।वस्त्राणांजलेनक्षालनंमृन्मयानांत्या
गःकुसुंभगुडकार्पासलवणतैलसर्पिर्धान्यानिद्वारेकृत्वावेश्मनिपावकंदधा
तू॥ततोब्राह्मणभोजनंत्रिंशद्गावोवृषभैकोदक्षिणापुनर्लेपनखननहोमज
प्यैःशुद्धिः॥अधिकसंसर्गेधिकं॥कल्यांवृद्धरोगिबालापत्यागर्भिणीनां

कृम्॥ बालानां प्रहरद्वयमभोजनं॥ रजकादिष्वतोर्धं॥ चंडालगृहप्रवेशे गो
चंडालेन सह वृक्षछायायां गृहे वावस्थाने षण्मासं कृछ्राभ्यासः॥ द्विमासं
शूद्रस्याएवकः कैवर्तादेः॥ क्षत्रियवैश्ययोश्च तुल्यः॥ अनिष्टगंधस्पर्श
शब्दरूपवाक्यानामाघ्राणस्पर्शश्रवणदर्शनकथनेष्वादित्यदर्शनम्॥ चंडा
लेन सहैकवृक्षमारुह्य तत्र फलभक्षणे सचैलंस्नानं॥ चंडालादीन्पंच
मांश्च भुंजानो दृष्ट्वा ग्रासं समुत्सृज्यांतर्वास्यमुखलेपान्प्रक्षाल्य स्नायात्॥
किंचिन्मात्रनिगरणेष्टशतजपः॥ तद्ग्रासभोजने पक्षिपर्यैण्यवासः॥ स
मस्तभोजनत्रिरात्रं॥ जलपने तदर्धम्॥ श्वादिष्वाचमनं॥ भुक्त्वापि ता
तदर्धम्॥ चंडालादिरवं भुंजानः श्रुत्वा भोजने विरम्येव शुध्येत॥ भुक्त्वोत्सा
त्वाष्टशतजप उपवासो वा॥ चंडालाद्युच्छिष्टकांस्यभोजने कृच्छ्रम्॥ मन्म
येति कृच्छ्रः॥ रजकाद्युच्छिष्टस्पृष्टे तदर्धं॥ चंडालादिस्पृष्टान्नभोजने त्रिरात्रम्॥
चंडालादिदृष्टान्ने तूपवासः पंचगव्यं च॥ चंडालादिहस्तभोजने कार्यं चां
द्रं वा॥ तद्धस्तेन भोजने त्रिगुणम्॥ चंडालाद्युच्छिष्टभोजने चतुर्गुणं॥ चं

डालादिभोजनोत्तरं तत्पात्रावशिष्टमात्रोच्छिष्टं ।। तद्धस्तनिर्मुक्तांबुपानेतू
पपवासः । तत्स्पृष्टिविषये तदर्धं । भुक्तोच्छिष्टश्चंडालादिदृष्ट्वोपवसेत्तत्स्प
ष्ट्वा त्रिरात्रं । चंडादिसंस्कारेभुक्त्वा • पक्वं गोमूत्रयावकं कृच्छ्रं वा । चंडालादि
र्यस्य गृहेऽज्ञातस्तिष्ठति तस्यान्नममत्या भुक्त्वा प्राजापत्यं ।। गायत्र्यष्टस
हस्रं द्रुपदां शतं वा जप्त्वा त्रिरात्रांते पंचगव्यं पिबेत् ।। भुक्तोच्छिष्टचंडालादि
स्पर्शेप्येवं ।। मत्या पराकः ।। चंडालादिभांडसंस्पृष्टांबुपाने गोमूत्रयावकं
त्रिरात्रं ।। उपोष्य ज्ञातवेदसे वा जपेत् ।। अमत्या शक्रस्याप्युपवासः ।। भो
जने षड्रात्रं । अभक्ष्यभक्षणे त्रिरात्रम् ।। प्राणायामशतं वा । रजकादिविषये चंडा
लाद्युक्तार्धं ।। उच्छिष्टः श्वादीन्शूद्रं मत्याऽमेध्यादिस्पृष्ट्वा चोपोष्य पं
चगव्यं पिबेत् ।। रजस्वलासूतिकामेध्यपतितचंडालपुल्कसावधूतकुंठह
सृजैं कुणिकुष्ठिकुनख्यस्पृश्यया शौचितः स्पृष्ट्वा मत्या भुक्त्वा कायां । अमत्या
र्धं ।। एतत्स्पृष्टान्नभोजनेप्येवं ।। कुणिः हस्तविकलः । अशक्तएषु केशासु

पपन्नेच ब्राह्मीं पिबेत् ॥ भोजनकाले ऽन्नेमक्षिकाकेशादिदूषिते ऽनंतरमपः स्पृशे
त् ॥ तच्चान्नं भस्मना वा मृदा वांबुना वा स्पर्शयेत्ये ॥ अस्थ्ना दूषिते स्नानं घृत
प्राशनं च ॥ दंतैर्दंतपाते चैवं ॥ रक्तादिदृष्टौ तूपवासः ॥ मुखे तद्दर्शने त्रिरात्रं ॥
भक्षणे ब्राह्मीरसो ॥ तादृशजलपाने कुशोदकम मेध्यसेविकीटोपहतभुक्तो भुं
जानस्य शूद्रस्पर्शे नहूंपंक्तौ वा भुक्त्वोपवासं पंचगव्यपानं च कुर्यात् ॥ मत्स्यासं
तपनं । वामहस्तेन भिन्नपात्रान्नभुक्तौ एकपंक्तावेकस्मिन्नुत्थिते पश्चाद्भुक्तौ चो
पवासो ऽन्नेन त्यक्तं वा पंचगव्याशनं च ॥ विडालकाकाखुनकुलगवाद्युच्छिष्टभ
क्षणे एकरात्रं ब्राह्मीसुवर्चलापानम् ॥ अकामतः सकृदत्यल्पभोजने एतत् ॥
ततो ऽधिकभोजने एकउपवासः ॥ पूर्णाहारभोजने त्रयस्ते ॥ सकृदत्यल्पस्य का
मतः कृच्छ्रपादः अकामतोभ्यासे ति कृच्छ्रः कामतोभ्यासे पक्षं यावकव्रतं ॥ तो
श्वोच्छिष्टे त्वीदृशे विषये मासं यावकव्रतं ॥ विप्रः शूद्रोच्छिष्टभोजने सप्तरात्रं पं
चगव्यं पिबेत् ॥ विप्रोच्छिष्टाशने एकाहः अभ्यासे आद्ये चांद्रायणं । द्वितीये
प्राजापत्यं । अकामतस्त्वाद्ये षड्रात्रमभोजनम् ॥ अंत्यमहाव्याहृत्यभिमंत्रि

तोदकपानं ॥ तत्राभ्यासे द्वैगुण्यादिकल्प्यं ॥ शूद्रोच्छिष्टवत्स्त्र्युच्छिष्टे ॥ मातृ
भगिनीभार्याभिरन्ययोषिभिश्च सहभोजने ~~दोषे ॥ आपदि विप्रस्य शूद्रगृहे~~
~~भोजने मनस्तापाच्छुद्धिर्द्रुपदया: शतजपश्च ॥ कामतः पीतोच्छिष्टपानी~~
~~षपाने~~ थ्व चांद्रायणं ॥ भार्यया सहभोजने तदुच्छिष्टभोजने च दोषाभाव आप
द्विषयो विवाहविषयो वा ॥ ज्येष्ठभ्रातृपित्राद्युच्छिष्टभक्षणे + न दोषः ॥ आपदि
विप्रस्य शूद्रगृहे भोजने नस्तापाच्छुद्धिर्द्रुपदया: शतजपश्च ॥ कामतः पी
तोच्छिष्टपानीयपाने वामहस्तेन वा पाने त्र्यहं ॥ रक्तपुष्पीविपक्वक्षीरपानं ॥
स्त्रीकुक्कुटे । च्छिष्टजलपानेषड्रात्रं ॥ इदमभ्यासे ॥ सकृत्स्नानतस्त्वाचमन
मेवेत्याहुः ॥ भुंजानेषु वा यत्र शूद्रः स्पृशेत्तत्रोच्छिष्टं वा मयछेत्तत्राहोरात्रमभो
जनं पंचगव्यपानं च ॥ उच्छिष्टपंक्तिभोजने च ॥ वामकरदत्तान्नभोजने स्नान
पुनःसमुत्थितो भोजने भुक्तभोजनभोजने च ॥ शूद्रभाजनभिन्नभाजनयोर्भोज
नेहोरात्रोपवासः ॥ पंचगव्यपानं च ॥ मत्या त्रिरात्रं ॥ भिन्नकांस्येऽमत्या त्रिरात्रम् ॥
मत्या कार्यं ॥ भिन्नभांडान्नभोजने पंचगव्यं घृतं वा पिबेत् ॥ वयकश्चित्स्वकुंभी

तिंदुककोविदारकदंबवल्लीपलाशपद्मवृक्षपत्रेषु भोजने चांद्रं ॥ वानप्रस्थ
यत्योरन्येषां पद्मपत्रभोजने चांद्रफलं ॥ उच्छिष्टस्यानुच्छिष्टविप्रस्पर्शे द्वा
गायत्रीजपः ॥ तत्सकाम्येऽत्यर्थ उच्छिष्टविप्रयोस्स्पर्शेऽप्येवं ॥ अनुच्छिष्ट
स्योच्छिष्टविप्रस्पर्शे आचमनं ॥ उच्छिष्टमानवस्पर्शे तथा भोज्यस्पर्शे वा हस्तपा
दप्रक्षालनपूर्वकाचमनम् ॥ उच्छिष्टविप्रस्यानुच्छिष्टशूद्रस्पर्शे स्नानम् ॥
उच्छिष्टतत्स्पर्शे कृच्छ्रम् ॥ आपद्यशक्तस्य स्नानतः स्पर्शे उच्छिपवास एकः
पेयद्रव्यहस्तस्योच्छिष्टेन स्पर्शे तद्द्रव्यसाहित्येनाचमनाच्छुद्धिः ॥ भोजन
कालपंक्तिपरिवेषणादौ उच्छिष्टीयानुच्छिष्टहस्तादिना स्पर्शे भूमौ द्र
व्यं निधायाचमेत् ॥ द्रव्यस्य चाभ्युक्षणाच्छुद्धिः ॥ साक्षादुच्छिष्टहस्त
तु स्पर्शे तु स्नानं ॥ उच्छिष्टस्य तेलाभ्यक्तस्याकृतश्मश्रुकर्मणः कृतमैथुन
स्य मूत्रादिकरणे एक उपवासः ॥ उच्छिष्टस्य सूर्यादिदर्शने उपवासः ॥ उ
च्छिष्टस्य पलांड्वादिस्पर्शे त्र्यहं कुशजलपानं सावित्रीजपश्च ॥ अत्राकामतो
धरोच्छिष्टस्य च तत्स्पर्शे उपवासः ॥ अनुच्छिष्टस्य तत्स्पर्शे स्नात्वा नक्तं ॥

केशनिर्मितवस्त्रधारणेऽउपवासः पंचगव्यघृतहिरण्योदकपानं चाधिकमि
तिस्मृत्यर्थसारे ॥ कृतमूत्रपुरीषस्य लशुनादिस्पर्शेऽउपवासः ॥ भुक्तोच्छि
ष्टस्य तद्द्वयं ॥ तत्स्पर्शमात्रे स्नानं ॥ इदं च सर्वं गावच्छिन्नस्पर्शे ॥ सुरायाईष
त्स्पर्शेप्येतदेव ॥ जान्वधः सुरास्पर्शे स्नानं तदानाभेरुपवासः ॥ तदूर्ध्वं स्पर्शे त्रि
रात्रम् ॥ स्त्रीबालवृद्धमशकमक्षिकागृहमार्जारमूषकादयो नित्यं मेध्यशु
द्धाः ॥ उच्छिष्टसमये नुष्ठानसमये च मार्जारस्पर्शे स्नानमिति मिताक्षरा ॥ रु
द्रनिर्माल्यस्पर्शे सचैलं स्नानं ॥ शैवसौरनिर्माल्यनैवेद्यभक्षणे चांद्रं ॥ अभ्या
से द्विगुणादि ॥ अमत्याभ्यासे सांतपनं ॥ अनापदि हरेरन्यनिर्माल्यभक्षणे ए
वमेव ॥ वैष्णवनिवेदितभक्षणेर्धकृच्छ्रम् ॥ हरेर्निर्माल्यनैवेद्यभक्षणे चांद्र
फलमिति स्मृत्यर्थसारे ॥ धनहर्त्रा प्रेतक्रियाया अकरे यद्दुपर्णवधे यत्प्रा
यश्चित्तमुक्तं तदर्धम् ॥ तदेवेति केचित् ॥ गोविप्रचांडालादिहतो दंष्ट्रिगरदा
ग्निदात्मघाती शृंगिदंष्ट्रि विषवह्निजलविद्युत्सरीसृपहतसंकरजातपति

तदा वहनदहनोदकादिक्रियाकरणे तप्तकृच्छ्रम् ॥ अमतिपूर्वं गोमूत्रयावकाहा
रेण कृच्छ्रं केवलं ॥ तच्छवस्पर्शमात्रे केवलेश्रुपाते चैकोपवासः ॥ यं कंचित्स्वे तमु
द्दिश्य तद्बांधवैस्सहाश्रुपातने स्थिसंचयनोत्तरं कृते स्नानं ॥ ततः पूर्वं तु स
चैलं तत् ॥ शूद्रप्रेतानुगमने स्नानमष्टोत्तरसहस्रगायत्रीजपश्च ॥ द्विजप्रे
तानुगमने ष्टशतं सः शूद्रस्य तु तत्र स्नानमेव ॥ अथानशनजलाग्निपतना
निसंकल्प्य ततो भ्रष्टस्य संन्यस्य पुनर्गार्हस्थ्यपरिग्रहे गृहस्थतामिच्छतश्च कृ
च्छ्रत्रयपूर्वकं चांद्रायणत्रयपूर्वकं पुनर्जातकर्मादिसंस्कारकरणं षण्मासं कृच्छ्रा
भ्यासो वा ॥ ततः पुनः संन्यासेन शुध्येत् ॥ शक्तिकालाद्यपेक्षया व्यवस्था ॥
असमर्थस्य तप्तकृच्छ्रं चांद्रायणं वा ॥ ये त्वात्मघाताद्यशास्त्रीयमरणेन मृ
तास्तत्पुत्रैश्चांद्रायणतप्तकृच्छ्रद्वयात्मकं प्रायश्चित्तं कृत्वैव तत्क्रियाः कार्याः ।
क्रोधादिनात्मत्यागाध्यवसायमात्रे उपवासत्रयं ॥ अध्यवसायकतिपयव्यापा
रं कृत्वा स्वत एव निवृत्तो घृताभ्यक्तो मौनी प्राणायामं कृत्वा गायत्रीजपश्च त्रि
रात्रमुपवसेत् ॥ अन्येन निवर्तितस्य द्विगुणं ॥ अध्यवसायशस्त्रादिक्षतकरणे

प्राजापत्यं ॥ इदं क्षत्रे चार्द्धं ॥ च्चितिभ्रष्टा तु या नारी मोहाद्विचलिता तथा ॥ प्राजा
पत्येन शुध्येत् ॥ रजस्वले एकभर्तृके मस्या मस्यावा परस्परस्पृष्टे सद्यः स्नानेन शु
ध्यतः ॥ असपत्न्योस्तु सवर्णयोर्भिगोत्रसंबस्ययोरमस्यास्पर्शे स्नानमा
त्रं मस्यात्वेक उपवासः परेद्युः पंचगव्यपानं च ॥ असंबस्ययोः सवर्णयोः स
र्शने तु मस्याऽशुद्धेरनशनं ॥ अमस्यास्नाताद्दिनांते रात्र्यंते वा शुद्धिः ॥ तन्म
ध्ये भुक्तौ दिनसंख्याकोपवासः ॥ विप्राशूद्रयोरजस्वलयोः स्पर्शे विप्रायाः
कृच्छ्रः शूद्रायाः पादः अस्यानि[illegible]चतुर्थाशादानभिसन्ध्ये ॥ अकामतस्तु वि
प्रायायावच्छुध्यशोनेनं ॥ शूद्रायाः स्नानमात्रं ॥ क्षत्रियवैश्ययोः कलाभेवा
तच्छुद्धिर्न विचार्यते ॥ चांडालाद्यं सलावसाद्यि पतितशवादीनां मस्यास्पर्शे र
जस्वला तदाचहान्यभुंजनातिक्रम्य प्रायश्चित्तं कुर्यात् ॥ तच्च प्रथमेह्नि त्रिरात्रं
द्वितीयेद्व्यहं ततौ तीयेहोरात्रं चतुर्थेन स्कं ॥ अत्रोपवासा एव त्रिरात्रादिषु सा
हुः ॥ इदं च तुचेर्थीहानंतरं कार्यम् ॥ प्रथमादिदिने यदि भुंक्ते तदा पश्चाच्चांद्रं पा

दपादन्यूनंच दिनानुसारेण ।। अमत्या चांडालादिस्पर्शे तु तद्दाघनाहारका
ले नैव शुध्येत् ।। प्रथमादिदिने भुक्तौ प्रागुक्तत्रिरात्रादिप्रत्याम्नायाः ।। शौं
डिकादिस्पर्शे घं ।। श्ववृकशृगालवानरखरोष्ट्रविड्वराहकाककुक्कुटादीना
मुच्छिष्टशूद्रस्य च स्पर्शे मत्या तद्दाघहान्यभुंजानायाः शुध्यतरंप्रायश्चि
त्तं ।। तच्च प्रथमेह्न्यभुक्तिः द्वितीये एकाहं तृतीये नक्तं ।। तत्र प्रथमादि
दिनेषु भुक्तौ प्राजापत्यं पादपादन्यूनं च ।। अमत्या तत्स्पर्शे तु तद्दाघभुंजाना
काले नैव शुध्येत् ।। भुक्तौ प्राजापत्यादिप्रत्याम्नायाः ।। चंडालरजकरजस्व
लाश्वादिस्पृष्टानां मत्या स्पर्शे हीनामेध्यादिमलोच्छिष्टस्पर्शे च तद्दाघहा
न्यभुंजाना तिक्रम्य प्रथमे उपवासं द्वितीये नक्तं तृतीये एकभक्तं परतः पं
चगव्यम् ।। प्रथमादिने भुक्तौ त्रिरात्रो वा पेसनक्तादि ।। अमत्या तत्स्पृष्टस्पर्शे
ने भुक्ता काले न शुध्येत् ।। भुक्तौ प्रत्याम्नायाः अशक्तावमत्या चंडादिर
जकादिस्पर्शे तु सद्यः स्नात्वा शुचिः आचंद्रदर्शनं नाश्नीयात् ।। असरा
क्तौ स्नानमात्रं ।। उच्छिष्टयोः रजस्वलयोरमत्या स्पर्शे विप्रा त्रिरात्रं कृच्छ्रेण शु

स्मृ.

स्पर

ध्येत् ॥ स्नुषा दाने रूपोषिता ॥ दानं चात्र निष्क चतुर्थांशस्य ॥ यद्वानुच्छिष्ट
योः परस्पर्शोन्यस्पर्शो वा तद्वोच्छिष्टे द्विगुणं बोध्यं ॥ अधस्तनोच्छिष्टे त्वेक
उपवासः ॥ ऊर्ध्वोच्छिष्टे त्रिरात्रं ॥ उच्छिष्टाया श्वचांडालादिस्पृष्टस्य स्पर्शे तद
घभुक्तेव त्रिरात्रा स्थितेषु सक्तोपस्त्याम्नायाः ॥ सर्वत्राशक्तौ कांचनं दद्या
त् ॥ ततः भवत्विति वाचयेत् ॥ अंत्यजादिभिरेकवृक्षसमारोहे होरात्रं पंच
गव्ये न क्षपयेत्सा ॥ रजस्वलायाः सामान्यतउच्छिष्टसवर्णा सवर्णस्पर्शे
रजो निमित्ताशौच निवृत्तिं यावदनशनं ॥ प्रायश्चित्ते समुत्पन्ने रजोदृष्टौ चै
वं ॥ सपत्नीं रजस्वलां स्पृष्ट्वा तद्दृष्टौ सद्यः स्नात्वा शुद्धिः ॥ असपत्नीं
सवर्णां तां स्पृष्ट्वा तद्दृष्ट्वैकरात्रं निराहारत्वं । हीनवर्णां तां स्पृष्ट्वा तद्दृष्ट्वा वाशु
द्धेरभुक्तौ पंचगव्याशनं । चंडालादिस्पृतिकाशवादिस्पर्शे तद्दृष्ट्वा वाशुद्धेर
भुक्तिः पश्चाच्चांद्र ॥ रजकादिस्पर्शे त्वाशुद्धेरभुक्तिः पश्चात्कायं च ॥
श्वादिस्पर्शे त्रिरात्रं ॥ अन्यास्पृश्योपहतौ उपवासः ॥ आशुद्धेरभोज

खु

यं सर्वत्र रजस्वलायाश्चंडालादिस्पर्शे शुद्धिपर्यंतमुपवासः ।। कामतस्तु त्रिरात्रोपवासपूर्वकं पंचगव्यपानमधिकं ।। प्रथमदिन एतद्दिसन्ये ।। उपवासासामर्थ्ये । फालकृष्टधान्यभक्षणं । उपवासांते पंचगव्यपानमधिकं ।। अकामतः श्वरजकादिस्पर्शे शुद्धिपर्यंतमुपवासः । कामतस्तु प्रथमद्वितीयदिनस्पर्शे त्र्यहं शुध्युत्तरं यावच्छुध्युपवासश्च । ततीये तु शुध्युत्तरमेकउपवासः ।। चतुर्थे नक्तंभोजनं । कामतोभ्यासे तु पंचरात्रोपवासपूर्वकं पंचगव्यपानम् ।। भोजनकाले रजस्वलायाः श्वानादिस्पर्शे षड्रात्रं गोमूत्रयावकाहारः । यावच्छुद्धि उपवासः ।। सर्वत्र । रजस्वलाया भुक्तोच्छिष्टद्विजस्पर्शे त्र्यहमुपवासः ।। अधरोच्छिष्टतत्स्पर्शे एकः ।। रजस्वलाया भोजनकाले रजस्वलांतरदर्शने पुनर्भोजने स्नानमभोजनं ।। ततो ब्रह्मकूर्चं च । भुंजानायाश्चंडालदर्शने उपवासत्रयं ।। कामतस्तु प्राजापत्यं ।। रजस्वलाया आशौचिस्पर्शे स्नानोत्तरं त्रिरात्रोपवासः ।। तत्स्पर्शोत्तरं मध्ये भोजने तु प्राजापत्यं ।। मृतकसूतकवसारजोदर्श

नेआस्नानमनशनं ॥भुक्त्वाचांद्रायणं ॥बालापत्यागर्भिण्योस्तुसद्यः स्नानेन
भोजनं ॥ रजस्वलायाबंधुमरणश्रवणादानपिपूर्ववत् ॥ सर्वत्ररजस्वला
याउष्णजलेनैवस्नानं ॥ गात्रसंमार्जनंवस्त्रनिष्पीडनंच ॥प्रायश्चित्तेःस
मुत्पन्नेरजोदृष्टौबालापत्यागर्भिण्योरभिषेकेकृतेशुद्धिः पश्चादनशन
प्रत्याम्नयः ॥कृच्छ्रादिव्रतस्थायास्नानेनैमितिकेप्राप्तेरजस्वलायाः
पात्रांतरितैस्तैः ततोऽद्भिः सिक्तगात्रावस्त्रपीडनमन्यवस्त्रधारणंवाकृ
त्वाव्रतंचरेत् ॥सूतकमृतकयोर्मध्येरजोदृष्टावस्नात्वाभोजनंशुद्धौतूप
वासः ॥मृतसूतकसंस्पर्शेऋतुंदृष्ट्वाऽस्नानान्नाश्नीयात् ॥तत्रमत्या
भुक्त्वाचांद्रम् ॥रजस्वलांदृष्ट्वाभोजनेशुद्धौतूपवासः ॥कुर्वतीरजस्व
लांस्नानकालेनाश्नीयात् ॥व्रतस्थायाउत्तररात्रेपंचगव्यंच ॥आर्तवमध्ये
मृताशौचेतुस्नात्वाभोजनं ॥रजस्वलायाव्रतस्थायारजस्वलाभिभा
षणेउपवासः ॥प्रारब्धेदीर्घव्रतेरजोदृष्टौलोपोनास्ति ॥हविष्यभोजना

गोभतनजं ५

दिकुर्यात्स्नआघनेन कारयेत्॥ शुद्धिकाले तस्नात्वा भुक्तौ कार्यं॥ मत्स्याचांद्रं॥ रजस्वलायां नैमित्तिकस्नानं भासोपात्रांतरिततोयेन तत्॥ तत्र गात्रसंमार्जनं वस्त्रनिष्पीडनं च न कुर्यात्॥ अन्यवस्त्रधारणं च नेत्येके॥ तस्या ज्वरादौ चतुर्थेऽन्हि अन्या स्त्री सचैलमवगाह्याचम्य दशकृत्वो द्वादशकृत्वो वा स्पृशेत्॥ अंते वस्त्रत्यागः॥ ततस्ता शुद्धा यथाशक्ति दत्वा पुण्याहवाचनेन विशेषतः॥ अथंचातुरमात्रे स्नानप्रकारोनुसरणीयः आतुरस्नानउत्पन्ने दशकृत्वोत्वनातुरः। स्नात्वा स्नात्वा स्पृशेदेनं ततः शुध्येत्स आतुरः इति पराशरस्मरणादिति मिताक्षरकारादयः॥ रजस्वलासूतिकयोर्मरणे नर्योर्मलं प्रक्षाल्य स्नापयित्वा काष्ठवद्दग्ध्वा विप्रवचनैः पश्चात्प्रायश्चित्तं कृत्वास्थीनि दहेत्॥ रजस्वलांजनाभ्यंजनस्नानप्रवासदंतधावननखनिकृंतनरजःस्पर्शव्यापारतांबूलमधुमांसगंधपुष्पदिवास्वापग्रहनक्षत्रनिरीक्षणादि वर्जयेत्॥ पाणौ मृन्मये वापि भुंजीत सा

द्धिर्नियमस्थश्च स्यात्॥ अत्र सर्वत्र स्नानं सचैलं स्यात्॥ इत्यादिरजस्व
लाविधिः॥ अनुद्दिष्टेषु दंड अर्थवादस्तुतिनिंदाभिः कल्प्यमिति॥ इति
प्रकीर्णकप्रायश्चित्तानि॥ तत्र जातिभ्रंशकरेषु कामतः कृतेषु सप्ताह
साध्यं महासांतपनं॥ अकामतः प्राजापत्यं सकृन्मत्याकृतयोस्संकरी
करणापात्रीकरणयोः शिशुचांद्रायणं॥ अज्ञानतः संकरीकरणानुष्ठाने
मासं यावकाशनं ज्ञानतः कृच्छ्रातिकृच्छ्रः॥ अज्ञानत अभ्यासे चांद्रायणं॥
ज्ञानतस्तथात्वे तद्द्वयं अज्ञानाद्यात्रीकरणे तस्य कृच्छ्रं शीतकृच्छ्रं वा॥ ज्ञान
तो महासांतपनं चांद्रायणं वा पूर्ववत्॥ अज्ञानतो मलिनीकरणानुष्ठाने त्र्य
हं तसपावकपानं ज्ञानतस्तत्र कृच्छ्रमहासांतपनं वा॥ अज्ञानतोभ्यासे कृ
च्छ्रातिकृच्छ्रः॥ समसंगतः प्रत्येकं प्रातिस्विकानि च केषुचिद्द्रक्ष्यंते॥ तत्र जा
तिशक्तिगुणाद्यपेक्षये तान्यपि योज्यानि॥ उपपातकेषु तु उपपातकशुद्धि
स्यादेवं चांद्रायणेन वा पयसा वापि मासेन पराकेणाथ वा पुनरिति याज्ञवल्क्यो

त्कंचतुष्टयम्॥ एवमित्तरस्य मासं पंचगव्यपानेन मासंप्राजापत्याभ्यासेन मास
मतिकृच्छ्रेण वा त्रिरात्रोपवासपूर्वकमेकादशगवसहितैकवृषभदानेन वैश्य
र्थः॥ पापाल्पत्वगुरुत्वदेशकालवयःशक्त्यादिकमपेक्ष्यैषां व्यवस्था बोध्या॥
कामकृतासंताभ्यासे तु गोवधे वक्ष्यमाणं मानवं त्रैमासिकं॥ तथा चोपपा
तकानुक्रमे गोघ्नवद्विहितः कल्प इति॥ कश्चित्स्मृतिपद्योक्तान्यथुच्यंते॥
नत्र गोवधो तत्र ब्राह्मणस्वामिकचतुर्हायण्यादीनां गवां शस्त्रलोष्टमुद्गल
गुड विषाग्न्यादिभिः साक्षाद्बुद्धिपूर्वकामतो वधे मासगोमूत्रसहितयाव
कयवागूपानं॥ शृंगलांगूलखुरश्रवणयुतार्द्रस्वहतगवीचर्मवृतैतस्य गोष्ठे
वासः॥ ततो मासद्वयं चतुर्थकालभोजनमक्षारलवणं मितं मासत्रयमपि
गोमूत्रेण स्नानम्॥ दिवा ताननियच्छेत्तु व्रजे अनुतिष्ठेदनुत्सपेत्तासु गच्छं
तीषुर्ध्वं तिष्ठन्रजः पिबेत्॥ रात्रौ ताः सेवित्वा नत्वा वीरासनी भवेत्॥ भि
त्त्याद्यनाश्रित्योपवेशनं वीरासनं॥ उत्थितस्तु दिवा तिष्ठेदुपविष्टस्तथा

निशि। एतद्वीरासनं नामेर्शैत्याभयादिभ्यस्ताः सर्वप्राणेर्विमोचयेत्॥ तासु
शीतोष्णवर्षावातपीडितासु ताअरक्षयित्वात्मनो रक्षणं न कुर्यात्॥ स्वपरगृह
क्षेत्राभादिभक्षयतीर्न कथयेन्न वारयेत्। पिबंतं वत्सं च। एवं मासत्रयेण त
स्यापमोक्षः॥ अत्र स्नानं गभूतमंत्रपाठस्संध्यावंदनं च कार्यं॥ एवं ब्रह्मघ्नादी
नामपि व्रतं गुरोश्चार्थं तद्भवेत्स्येवा स्त्रीणां तु गवानुव्रज्या गोष्ठशायनगवा
जिनधारणजपादिकं नास्ति स्त्री। बालवृद्धादीनामर्धं शूद्रस्य चा स्त्रीधर्मित्वा
त्॥ रुद्राणां च सधर्माणः सर्वे पध्वंसजास्स्मृता इति मनूक्तेः प्रतिलोमाना
मप्यर्धम्॥ वैश्यतुल्यशूद्रस्य तु पूर्णमेवेति स्मृत्यर्थसारे। अज्ञानात्कृतेप्य
र्धं। अत्र पूर्णव्रते एको वृषभः दशगास्तन्मूल्यं वा दक्षिणा। अर्धव्रते एका गौः
तावन्य विधेमानेसर्वस्वं॥ अत्र मासमीषत्कोमूत्रसहितयावकपाने प्राजा
पत्यद्वयं सांतरेति कर्तव्यता सहितमासोपवासे दशप्राजापत्यानि। एकाद
शेति स्मार्तः॥ त्रिंशन्नक्तैः पंच चत्वारीति स्मार्तः॥ संकलनया सप्तदशप्रा

जापत्यानि वा सप्तदश धेनवो वा तन्मूल्यं वेति चत्वारः पक्षाः ॥ मूल्यं च ता
वद्द्रव्यलभ्यं कांचनं गोर्वासोऽश्वो भूमिस्तिला घृतमन्नं चापत्रयद्रव्यं तन्ना
मोल्लिख्य संकल्पः कार्यः ॥ चतुर्ष्वपि दक्षिणा प्रागुक्तैव ॥ ज्ञानकृते क्षत्रिय
स्वामिकतादृशगवीवधे षण्मासं चर्मणावृतो गोग्रासदो गोव्रती यवाशी
गोभिरेव संचरन्विमुच्यते ॥ अत्र षाण्मासिकव्रते द्वादश प्राजापत्यानि द्वाद
श धेनवस्तन्मूल्यं वेति चत्वारः पक्षाः । दक्षिणा यथाशक्तीति शूलपाणिः ॥ अ
न्ये तु वृषभहंता वृषभं स्त्रीगवीहंता तां दद्यादित्याहुः । वृषभरहिता दश गाव
इति गौडाः ॥ अज्ञानकृते तदर्धम् ॥ स्त्रीबालादीनां च प्राग्वत् ॥ अज्ञानकृते वैश्य
संबंधिगवीवधे मासं पंचगव्यपानं गोमतीमंत्रजपोंते गोदानं ॥ अत्र मासव्रते
चत्वारि प्राजापत्यानि चतस्रो धेनवस्तन्मूल्यं वा ॥ पंच प्राजापत्यानीति शूल
पाणिः ॥ दक्षिणा त्वेका धेनुः ॥ ज्ञानतो द्विगुणमेतत् ॥ अत्र चर्मादिधारणं ना
स्तीति ॥ ज्ञानकृते शूद्रसंबंधिगवीवधे प्राजापत्यचतुष्टयं चतस्रो धेनवस्त

मूल्यं वा ॥ यस्य लगुडादिव्यापारानंतरं कारणांतरनिरपेक्षः कालांतरेपि
गवां प्राणमोक्षस्सोपि साक्षाद्गोघ्नः ॥ अज्ञानकृतत्वं च गां ज्ञात्वैतां हन्मीति का
मनया हननं ॥ एतद्रहितमज्ञानकृतं तद्धिहिंसं च कामनाभावेनलतत्स्य का
रकप्रमादात्मकज्ञानाभावेन वा ॥ एवं सर्वत्र बोध्यं प्रायश्चित्तानंतरं पार्वण
विधिना श्राद्धं कार्यं ॥ तत्र जीवत्पितृकेणापि किंतु देयपितृभ्य एवा गोच
र्मधारणं च गोपतये गोमूल्यं प्रतिरूपगवालरं वा दत्वा कार्यं ॥ पत्रदानेति
दृलेख्यं ॥ पूर्वदिने सशिखं वपनं कृत्वा परदिने घृतं प्राश्योपोष्य तत्परदिने स्ना
नादिकं विधाय व्रतं तत्प्रतिनिधिं वा संकल्प्यानुष्ठाय संप्रदानाय यथोक्तां
दक्षिणां दत्वाऽच्छिद्रावधारणं कुर्यात् ततः पार्वणविधिना श्राद्धं भोज्यदानं
च कार्यममुकस्य मतमेतदिति ॥ यत्स्वामिकगवीवधे यत्प्रायश्चित्तमुक्तं
तत्स्वामिकगर्भिणीकपिलाबहुक्षीरावहुक्षीराहोमधेन्वादिवधे तद्द्विगुणं ।
सचेतनगर्भयुक्ताया भिदांउस्पन्त्रमात्रगात्रसंमितपूर्णाचेतनगर्भयुतायाः

सुक्रमेण सपादं पादद्वयं सपादत्रयं पूर्णं प्रायश्चित्तं लगुडादिघातेपि गोजीव
नेगर्भमात्रपाते पूर्वोक्तोत्सर्गादिक्रमेणैकपादमर्धत्रिपादं संपूर्णं च ।। अतिवृ
द्धातिकृशातिबालारोगिणीवधे ज्ञानाज्ञानकृते ज्ञानाज्ञानकृते पूर्वोक्तार्धं ।।
अतिवृद्धत्वं तृणच्छेदनासामर्थ्यं । अतिकृशत्वं दोहवाहनायोग्यत्वं ।। अतिबा
लत्वं द्विवर्षीयात्वं । एकवर्षात्रिवर्षावेधे तु पूर्वोक्तं क्रमेण पादं पादत्रयम् ।
एवं गृहदाहादिस्थलेपि ।। क्रमकृते तु प्रयत्नभेदेन पापभेदः ~~ह्लै~~ स्मृतिगवं
यथोक्तप्रायश्चित्तावृत्तिः ।। बहुभिरेकस्या हनने यत्र यद्विहितं तस्यैव पादं
पादं प्रत्येकेन करणीयम् ।। मिताक्षरायां तु कामतः पूर्णमकामतोर्धं हांमो केचि
त्तु ज्ञानेनार्धमज्ञानतः पादमाहुः ।। बहुभिरेकव्यापारेण द्वयोर्बहूनां च हनने प्र
तिपुरुषं पादद्वयं लक्रयं चक्रकल्प्यं । प्रयत्नभेदे तु प्रत्येकं प्रतिपुरुषं तदावृत्तिः ।।
द्वाभ्यां हनने तु प्रत्येकं संपूर्णम् ।। अत्यंतव्याधिपीडिता मरणावस्थापन्नो
न्मत्तांधा वर्षान्न्यूनत्वे धेनुपादम् ।। अथ मरुद्वके वत्सादिस्वामिकैकहायन्या

द्विचतुरादिहायन्यंतानां वधे क्रमेण प्राजापत्यार्धं प्राजापत्यसार्धं च तद्वयं वेति।
अज्ञानतोऽर्धमेतत्॥ तादृशगर्भिण्यादौ त्वेतद्द्विगुणं। अतिवृद्धादौ त्वेतदर्धम्।
यत्र या दक्षिणोक्ता सा द्वैगुण्ये द्विगुणा अर्धेऽर्धा पादे पादा तदर्धे तदर्धेत्येवं व्यवस्था
बोध्या। अग्निहोत्रिणो वेदपारगस्य होमधेनोः कपिलाया गर्भिण्याः पुण्यदे
शे पुण्यकाले च बुद्धिपूर्वकवधे तु वैश्यवधे वक्ष्यमाणं त्रैवार्षिकम्॥ एकशतं गा
एको वृषभश्च दक्षिणा॥ एवमन्यान्यपि गुरुप्रायश्चित्तान्येवं विधिविषये योज्या
नि॥ अथ पंचविधवधित्वनिर्णयः॥ चेतनांतरव्यापारव्यवधानमंतरेण प्राण
वियोगफलकव्यापाररूपवधनिष्पादकः कर्ता। योऽप्रवृत्तं पुरुषं वेतनादिना
प्रवर्तयति प्रवृत्तं वा प्रोत्साहयति स प्रयोजकः॥ वध्यस्य पलायनादिनिरोधको
ऽनुग्राहकः॥ एतां हन्मीति वाक्येनुमतिदाता निषेधक्षमोऽपि मौनावलंबी चानु
मंता उद्देश्यत्वे सति हंतुर्मनस्युत्सादको निमित्तम्॥ प्रयोजकादीनां क्रमेण पाद
पादहानिरिति शूलपाणिः॥ अष्टमभागहानिरिति भवदेवः पैठीनसिः॥ हंता

मंतोपदेष्टाच्चतथासंप्रतिपादकः॥प्रोत्साहकः सहायश्चतथामार्गानुदेश
कः आश्रयः शस्त्रदाताचभक्तदाताविकर्मणांउपेक्षकः शक्तिमांश्चदोषव
क्तानुमोदकऽअकार्यकारिणस्त्वेषांप्रायश्चित्तंप्रकल्पयेदिति।एवंसर्वत्रबोध्यम्॥
अथरोधादौप्रायश्चित्तम्॥क्षीणायागोरक्षीणात्वधमात्रेधेनववैधेयस्त्वामि
कगवीवधेऽज्ञानतोपत्य।प्रायश्चित्तमुक्तंतस्यपादः।तादृश्यास्तथाभ्रमादंध
नेनवधेतस्यपादद्वयं।तथाभ्रमाद्धलशकटादौअतिकालंयोजनेनमरणेतस्य
पादत्रयम्॥अतिदोहेप्येवं।अंगुष्ठस्थूलहस्तप्रमाणापत्रपलाशदंडनिपा
तनेनतादृश्यास्तथाभ्रमाद्वधेसंपूर्णम्॥उक्तदंडाधिकदंडनिपातनेनवधेतु
तद्विगुणमितिकेचित्॥क्षैण्यज्ञानेतुज्ञानकृतवधविहितस्यपादादिकं॥
रोधश्चात्ररात्रौरक्षार्थंक्रियमाणरोधातिरिक्ताहारप्रचारनिर्गमरोधः।वं
धनंचाहढकुशकाशादिरज्जुभ्यैति व्यतिरिक्तेनयथावंधनमकालवंध
नंवायोयोजनंहलशकटादावतिवाहनादि॥भवेद्देवस्तुवैरयस्वामिकग

व्याः क्षैण्यज्ञाने रोधादिनावधे क्रमेण चांद्रायणपादद्वयपादत्रयचांद्रायणानि ।
अज्ञाने तु प्राजापत्यस्यैव पादादिकमित्याह ॥ शूलपाणिस्तु सर्वस्वामिकगव्याः
क्षैण्यज्ञाने प्रात्यिकं मरणं ज्ञात्वा प्रवृत्तेन पुंसा रोधादिनावधे चांद्रायणपादादिकं ॥
क्षैण्यज्ञाने तु प्राजापत्यस्यैव पादादिकमितिप्राह ॥ चांद्रायणे वृषभसहिता गौर्दक्षि
णा । ताडनार्थमुद्यतं दृष्ट्वा भीत्या कूपादौ निमज्य मृते प्राजापत्यं ॥ ॥अथास्थि
भंगादिप्रायश्चित्तम् ॥ गवामस्थिभेदे लांगूलछेदने कर्णशृंगपाटने कटिभंगे
चर्मनिर्मोचने च षण्मासाभ्यंतरमरणे पूर्णप्रायश्चित्तं षण्मासोपरि मरणेऽर्धं
जीवने च मासार्धं गोमूत्रसहितयावकपानं सर्ववर्णानां ॥ तच्चैकप्राजापत्या
र्द्धं चाधमरुद्रस्वामिकैकहायनकगव्यास्थिभंगे तत्परं ॥ अन्यथा मरणेऽर्धंजी
वने प्राजापत्यमिति वैषम्यं स्यात् ॥ हलशकटयोर्विप्रेण वृषभवाहने प्राजापत्यद्व
यं । योषिद्गवीवाहने तद्द्विगुणं सर्वेषां ॥ समुत्सृष्टवृषभगवोर्येन केनापि वाहने दो
हनेनैच चांद्रायणद्वयम् ॥ कपिलादोहने विप्रस्याप्येतदेव ॥ उत्सृष्टवृषभगोवधे

द्विजस्य कपिलावधोक्तप्रायश्चित्तं। शूद्रादौ तु विशेषः वृषभादेरुत्सृष्टत्वेन स्वता
भावेपि भूतपूर्वस्वत्वमाश्रित्य पूर्वस्वामिकवृषभादिवधकर्तुर्यत्प्रायश्चित्तमु
क्तं तत्स्वामिकतद्वधस्य द्विगुणं बोध्यं ॥ अंडनाशे लिंगछेदने च मत्युतुल्यं
प्रायश्चित्तं ॥ तदनंतरं मरणे च द्विगुणं ॥ ॥ अथापालननिमित्तगोवधे ॥ त
त्राविभक्तानां भ्रातॄणां मध्ये सर्वानुमत्यैकेन प्रायश्चित्ताचरणे सर्वेषां पाप
क्षयान्न पृथक्प्रायश्चित्ताचरणं ॥ तत्र शूद्रस्य स्वामिनोऽपालननिमित्तवधे
पात्किंचिद्दक्षिणकं केवलं प्राजापत्यं ॥ द्विजस्य स्वामिनस्तु सशिखमुंडितस्य
त्रिसंध्यावगाहनशीलस्य पूर्वोक्तव्रते मौव्रतस्य गोव्रजवासिनो दिवारात्रं
तन्मध्यस्थितस्य प्राजापत्यम् । अंते ब्राह्मणभोजनमनडुत्सहिता गोश्च द
क्षिणा । इतिकर्तव्यतासहितप्राजापत्याशक्तौ धेनुद्वयं दक्षिणा प्रागुक्ते
वा शुलपाण्यादयस्तु सर्वेषां केवलं प्राजापत्यं ॥ तदशक्तौ धेनुरेका दक्षिणा
प्रागुक्तेत्याहुः ॥ उत्सृष्टवृषभादिषु स्वत्वाभावादपालनमतेषु अप्युत्सृष्ट

नदोषः॥अपालनमत्स्यश्वशीतानिलोद्बंधनशून्यागाराद्युपेक्षाजलादिम
ज्जनकूपादिपतनसर्पविद्युद्धननश्वभ्रपातव्याघ्रादिभक्षणकृतः।एतच्च
पालकासमर्पणोत्तत्समर्पणेतुपालकस्यैवदोषः।परंतुयावद्देवकालंपाल
काधीनतातावदेवाअशक्तपालकसमर्पणेतुस्वामिनएवदोषः॥पल्व।
लादिपतनेवत्स्याघ्रश्वापदश्वाचोद्बंधनसर्पाघैर्मृतेपादोनप्राजापत्यं॥
एवंभिक्षुतैलयंत्रार्थमाहारंदत्वासन्निधौरक्षणेदैवाद्दृढदाहभंगाभ्यांम[illegible]
भरणा रणेघंटादिदोषेणगवांविपत्तावर्धप्राजापत्यं।यदितुगोःशक्तिमनपेक्ष्य
दत्ताघंटादिदोषेणमरणंतदाप्राजापत्यम्॥शक्तपालकसत्वेकांतारदुर्गग
हराहावटेषुलतापाशाद्याकृतस्यपदिविपत्तिस्तदाप्रजापत्यपादएवेत्याहुः॥
नथात्रिहायनपर्यंतवत्सारक्षणेपिपादएव॥गोमांभक्षकेगोर्विक्रयेशिशु
चांद्रायणम्॥यदितेनवधःक्रियतेतदाज्ञानाज्ञानकृततत्स्वामिकगवी
वधप्रायश्चित्तंतस्यतस्यपालकबहुत्वेतुपालकानामविभक्तानामेकंप्राय

विभक्तानां तुवृकुपादां वहूनां गवामपालननिमित्तवधे द्विगुणं ॥ तत्रापि वहुकर्तृ
के तु प्रत्येकं द्विगुणं । पालकस्य द्रव्याभावे स्वामिना द्रव्यं दत्वा कारणीयं ॥ म्लेंछपा
लके तु स्वामिना कर्तव्यं ॥ अथ गोवधापवादः । दाहभेदशिराछेदप्रयत्नैरुपकुर्व
तां । द्विजानां गोहितार्थं प्रायश्चित्तं न विद्यते ॥ तुल्यन्यायाश्चैद्ब्राह्मणादिष्वेव
इदं च ज्ञानिन आदरेण यथावदुपचार एव ॥ शास्त्राज्ञस्यानादरेणापथावदुपचारे
प्राजापत्यस्त्रतांते धेनुर्दक्षिणा । अतिदोहेप्येतदेवेति केचित् । एवं यंत्रेण गोश्चिकि
त्सायां मूढगर्भविमोचने औषधस्लेहाहारदाने विपत्तौ च न प्रायश्चित्तं ॥ इदमपि
स्वेच्छया गृह्यमाणमधिकं दीपमानं मृतिजनकं चेत् तुच्छ्रपादं प्रयोजयति ॥ एवं कूप
सीमानिबंधनस्थानदेवद्रोण्यादिषु विपत्तौ तत्कर्तुर्न दोषः ॥ एवं मैथुन्येन गरे
ग्रामदोषेषु वा वद्धानां मृतौ पालकस्य स्वामिनश्च न दोषः ॥ वंधने तु पादकृच्छ्रं ॥ एवं
व्याधियुक्तानां गवां दंडाभिघातादिना मूर्छया पतनेनांतरेण गमनश्वासतोयपा
नेस्तदानीं मरणहेतुत्वभावनिश्चये पूर्वव्याधिनष्टानां न प्रायश्चित्तं ॥ यदि तु पूर्व

व्याधियुतापि प्रहारजनितपीडयैव व्यासादीनारूढ्वा म्रियते तदा प्रायश्चित्तं भ
वत्येव ॥ शालासै गवां मशकादिनिवृत्त्यर्थं धूमाग्निर्यो प्रज्वाल्य स्थितस्य दैवा
त्तदग्निना बंधनरहितस्य मरणेऽपि दोषाभावः ॥ तत्रानवस्थितो बंधने वा पादकृ
च्छ्रः ॥ त्रिशूलादिरूपस्थिततच्चिन्हकरणेन वाहादिना चर्मनिर्मोचने च न दोषः ॥
प्रमत्ता गौर्यदि निवारणंयंतं पालकमतिक्रम्य गर्तकूपांतरादौ पतनेन म्रियते तदा
पि न दोषः ॥ शंकारहिते वनादौ सति पालकेऽकस्मादागतव्याघ्रादिना गोमारणे
ऽपि न दोषः पालकस्य तत्रासत्वे तु दोष एव ॥ एवं राजगृहीतेषु वज्रवृक्षादिपतन
व्याघ्रव्याध्युपद्रववेश्मभंगग्रामघाततशरोघातिवह्न्यादिभिर्बहूनां पाल
कसत्वे मरणेऽपि न दोषः ॥ गोहरणे तु ॥ अश्वगोभूमिकन्याश्च हत्वा चांद्रायणं च
रेत् ॥ शूद्रान्यशूद्रस्य माहत्य प्राजापत्यं समाचरेदिति जाबाल्युक्तम् ॥ ॥ इति
गोवधप्रायश्चित्तनिर्णयः ॥ ॥ अथ ब्रात्यत्वे ॥ ब्रात्यस्वरूपं चदशैकविंशतित्र
योविंशतिवर्षस्वरूपब्रह्मक्षत्रविडुपनयनकाले तदभाववान् ॥ तत्र यस्योपन

यनेआपद्यभावेनतत्कालातिक्रमस्तस्यसाधारणोक्तचांद्रादिचतुष्टयान्यतमंश्रा
त्याकृत्वोपनयनंकार्यं। अनापदियस्यतदतिक्रमस्तस्यमानवत्रैमासिकांत
दसमर्थस्यसशिखवपनपूर्वकमेकविंशतिरात्रंप्रसृतिमात्रयावकपानंपंच
विप्रभोजनंच। यस्यषोडशावर्षादूर्ध्वमप्यनापदिबुद्धिपूर्वकंतदतिक्रमस्ते
नमासद्वयंपावकपानंमासंपयः पक्षमामिक्षाष्टरात्रंघृतंषड्रात्रमयाचि
तंत्रिरात्रमभक्षताहोरात्रमुपवासइत्यघालकव्रतंकार्यम्।। व्रात्यस्तो
मेनवायजेत्।। यस्यपितृपितामहावनुपनीतौतस्यसंवत्सरंभैक्षाशन
गुरुशुश्रुषादिरूपंब्रह्मचर्यं।। ततोयावतांपुरुषाणामनुपनयनंतावत्संख्य
संवत्सरंयावघ्नदंतिकेपञ्चदूरकेसत्ययावनीभिर्देवाः पवित्रेणेतियजुः पवित्रे
णकयानश्चित्रआभुवदितिसामपवित्रेणहंसः शुचिषदितिमंत्रैः स्नानंत
तोध्याप्यः।। यस्यतुप्रपितामहादिनानुस्मर्यतेतस्यप्रतिपुरुषंद्वादशवार्षिकं
ततः।। ततः उपनयनंततः स्नानं। तदनंतरमप्यस्यगार्हस्थ्यमात्रोपदेशानंनत

ध्यापनं नापि व्यवहारः ॥ तज्जन्यस्य तु स्वस्यैव सावित्रीकालातिक्रमप्रायश्चि
त्तं कृत्वा संस्कारः ॥ अस्याध्यापनादिप्रवृत्तिरिति ज्ञायते ॥ ॥ अथ स्तेये ॥ स्ते
यं चौर्यं ॥ तच्च विप्रस्वामिकसुवर्णतत्समव्यतिरिक्तमेवोपपातकं ॥ तत्र धान्य
हरणे तिलापहरणे च चौर्यं धातुलोहापहारे पराकः ॥ विप्रस्य विप्रस्वामिकद
शकुंभपरिमितधान्यतत्परिमिततंदुलादितत्तुल्यमूल्यताम्ररजताद्य
पहारे मत्यात्रैमासिकं ॥ मत्याभ्यासे वौं वा कृच्छ्राब्दं । क्षत्रियादेर्हर्तुः पादपाद
ह्रासः ॥ क्षत्रियस्वस्य वौं वैतावतो मत्यापहारे षाण्मासिकं । वैश्यस्वे त्रैमासि
कं । शूद्रस्वे चाब्दं कुंभश्च । अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौ च पुष्कलं । पुष्क
लानि च चत्वारि आढकः परिकीर्तितः । आढकानि च चत्वारि द्रोण इत्यभिधीय
ते । दशद्रोणा भवेत्खारी कुंभो पि द्रोणविंशतिरिति ॥ कुंभः पंचसहस्रपरि
माण इति स्मृत्यर्थसारे ॥ क्षत्रादिजातीयस्त्रीपुरुषयोः सार्धशतद्वयपणमू
ल्यतज्जातीयस्वामिकक्षेत्रवापीकूपतडागगृहपानीयरसानां तत्स्वामि

कुभूमिनिक्षेपरजतवज्रमणिनराश्वानामपहारेचांद्रं । वैश्यशूद्रस्वेतादृशेचांद्रतसादृशे । विप्रस्वेतादृशेस्वर्णस्तेयसमं । स्वर्णस्तेयसमवदिति तिस्मृत्यर्थसारे ॥ पाशेनसस्यदशपणमूल्याल्पसारत्रपुसीसाद्यपहारेसांतपनमित्येके । सार्धशतद्वयमूल्यविषयेएतदिति स्मृत्यर्थसारे ॥ एकवारभोजनपर्याप्तभक्षभोज्याद्यपहारे तत्सममूल्यपानशय्यासनपुष्पफलमूलपर्णमृद्भांडमधुसोमोपहारे पंचगव्येनाहोरात्रक्षपणं ॥ द्वित्रिवारभोजनपर्याप्तस्तदाहरणे द्वित्रिरात्रं तत् ॥ षड्दिनाहारपर्याप्तभोज्यमूल्यतृणकाष्ठद्रुमशुष्कान्नगुडतैलचर्ममांसापहारे त्रिरात्रं ततः ॥ त्रिवारभोजनपर्याप्ताहारमूल्येप्येतदेवेतिस्मृत्यर्थसारे ॥ द्वादशदिनाहारपर्याप्तविप्रस्वामिकमणिमुक्ताप्रवालताम्ररजतशंखशुक्तिलोहकांस्याद्यपहारे द्वादशाहं कणान्नतां त्रिवारभोजनपर्याप्ताहारमूल्यकार्पासकीटजोर्णाद्विखुरैकशफरज्जुपक्षिगंधौषधीनामपहारे एकउपवासः त्र्यहं पयःपानं वा । गजाश्वगोभूमिकन्याहरणे षडुपवासाः अभ्यासे चांद्रायणं षण्मासं गोमूत्रयावकाहारो वा ॥ एवं पुस्तकचौर्यादिषु

शु

८२

ऽपि क्रियमाणाल्पत्ववहुत्वाभ्यां प्रायश्चित्ताल्पत्वादिकल्प्यम्॥ देवद्रव्यापहा
रेद्वम्॥ यस्य वर्णस्य वृत्तिं मोहहरेत्स तद्धप्रयुक्तं प्रायश्चित्तं पादोनं कुर्यात्॥
अत्र सकृदभ्यासद्रव्यदेशकालस्वाम्यपहर्तृगुणवैगुण्याद्यवेक्ष्य गुरुलघु
तो ज्ञेया॥ इदं च प्रायश्चित्तमपहृतद्रव्यस्वामिने तद्धनोत्तरमेव सति स्वामिनि॥
इति स्तेयम्॥ अथ ऋणानपाकरणे॥ तत्र यज्ञाध्ययनप्रजारूपाणां देवर्षिपि
तृऋणानामनपाकरणम्॥ आत्मपितृपितामहादिभिरुत्तमर्णाद्गृहीतानां ध
नानामदानं च तत्र ब्रह्मचर्याद्यकरणमपि देवऋणम्॥ तत्र सामान्यचांद्रा
दिष्वेकं शक्त्या कार्यम्॥ सर्वथा तदसंभवे वैश्वानरेष्टिः कार्या॥ अत्रोत्तमर्णध
नादानेकालविलंबादिप्रयुक्तमेतत्प्रायश्चित्तमुत्तमर्णाय तद्धनं दत्त्वैव का
र्यं सति धने॥ अथानाहिताग्नितायम्॥ सा च सत्यधिकारेऽग्न्याधानाभावः॥
तत्रावृत्तौ प्रतिमासं त्रिरात्रं॥ ततः प्रत्यब्दं चांद्रादिष्वेकं शक्त्याऽनापदि त्रै
मासिकं॥ पितर्यनग्नावाधाधातुरयवत्रीयवृश्च सुतस्य ब्रात्यपरस्॥ कार्यः॥

औपासनाग्न्यसंधाने आद्यं प्रतिमासमुपवासः अब्दे चान्द्रादिवैकं । यद्वाद्यार्द्धकृ
च्छ्रः । ततो द्वितीये कृच्छ्रातिकृच्छ्रः । ततस्त्र्यब्दं ॥ ॥ अथापण्यविक्रये । अपण्यस्य
लवणादेर्विक्रयो हि सः । सुराविक्रये सौम्यचतुष्टयम् ॥ गुडतिलपुष्पफलमूल
पक्वान्नविक्रये सौम्यकृच्छ्रः । मत्या प्राजापत्यं ॥ लाक्षालवणमधुमांसतैलक्षी
रदधिघृततक्रगंधचर्मरक्तवस्त्रतिलहेमान्यतमविक्रये चान्द्रं ॥ मत्याभ्यासे त
त्रयम् ॥ अमत्यासकृदुपवासः । पयःपायसापूपेक्षुरसगुडखंडादीनां लेह्यप
क्वानां च पराकः ॥ पूगमंजिष्ठाखर्जूरद्राक्षाणां प्राजापत्यं पनसस्य त्रिदिनं
कदलीनारिकेल॰जंबीरबीजपूरकनारंगाणां पादकृच्छ्रः ॥ कर्पूरादेरर्धम् ॥
कस्तूरिकादीनां कृच्छ्रः ॥ मेषाद्युर्णिचमर्यादिकेश्यश्वादिकेसरिणां तद्वूर्णा
केशकेसराणां च भरधेन्वनडुद्रेभशस्त्रविक्रये चान्द्रं ॥ अभक्ष्यमांसस्नाय्वस्थिशृं
गनखशुक्तिहिंगुगुग्गुलुसर्जरसहरितालमनःशिलांजनगैरिकलवण
क्षारमणिमुक्ताप्रवालसैलवैणववेणुमन्मयेषु चतस्रः कृच्छ्राः ॥ अमत्यासकृदु

पवासः ॥ विषशस्त्रगोनीलीकौशेयविक्रयेप्राजापत्यम् ॥ कृष्णपीतादिवस्त्रेकृष्णाजिनादिकृष्णवस्तुविक्रयेत्र्यहं ॥ गजविक्रयेचांद्रम् ॥ खराश्वाश्वतरकरभाणांपराकः ॥ नारीविक्रयेचांद्रंपुरुषविक्रयेतद्द्वयं ॥ कन्यापुत्रविक्रयेतद्द्विगुणम् ॥ एकाहाद्वेदविक्रये चांद्रं ॥ अंगानांपराकः ॥ स्मृतीनांकृच्छ्रः ॥ इतिहासेपुराणानांसांतपनं ॥ रहस्यपांचरात्रादीनांकृच्छ्रं ॥ इतरविद्यामात्राविक्रयेपादकृच्छ्रः ॥ सोमविक्रयेउक्तप्राण्यतिरिक्तप्राणिभूविक्रयेतप्तकृच्छ्रंपुनरुपनयनं च ॥ आर्द्रौषधिपुष्पफलमूलचर्माम्रविदलतुषकपालकेशभस्मास्थिरोमरसपिण्याकतिलतैलविक्रयेप्राजापत्यं ॥ श्लेष्मजतुमधूच्छिष्टशंखशुक्तित्रपुसीसकृष्णलोहोदुंबरखड्गपात्रविक्रयेमहासांतपनं ॥ श्लेष्माचर्मविकारविशेषः ॥ आरामतडागोदपानपुष्करिणीसुकृतविक्रयेकृत्वात्रिषवणस्नायीअधःशायीचतुर्थकालाहारोगायत्रीदशसहस्रंजपन्नब्देनशुध्येत् ॥ हीनमानहीनोन्मानान्यमिश्रितान्यवस्तुविक्रयेचैवं ॥ मानंप्रस्थादि ॥ उन्मा

नंतुलादि। विषमतुलाधारणेर्धकृच्छ्रः॥ अत्र सर्वत्र दंडं पर्यालोच्य प्रायश्चिता
धिक्यं कल्प्यं। केशगोधूमविक्रये सांतपनम्॥ निगडादिविक्रये प्राजापत्यं।
गृहप्रतिश्रयोद्यानसभाप्रपादिविक्रये तप्तकृच्छ्रम्॥ तिलतैलदधिक्षौद्रल
वणद्राक्षामधुमांसपक्वान्नस्त्रीपुरुषहस्त्यश्वगोवृषभगंधरसक्षौमकृष्णा
जिनसोमनीली विक्रयात्सद्यः पतति विप्रः॥ प्रायश्चित्तं त्वकामकृते॥ एत
च्चापदि वैश्यवृत्त्याजीवतो विप्रस्यैव॥ अनापदि तु वैश्यभिन्नानां सर्वेषामेवा
शूलपाणिस्त्वापदि शूद्रस्यैव दोषाभावः क्षत्रियस्यापि भवत्येव प्रायश्चि
त्तमित्याह॥ शूद्रस्यापद्यपि मधुचर्मलाक्षासुरामांसानां विक्रये दोष एव
वा। तिलगोधूमादीनां क्रीतानां विक्रय एव दोषः कृष्युत्पादितस्य विक्रये तु
नेति बोध्यं॥ इदं च प्रायश्चित्तजातं तद्विक्रयार्जितधनोत्सर्गपूर्वकार्यमना
पदि॥ इत्यपण्यविक्रयः॥ अथ परिवेदने॥ अकृतविवाहो ग्रजोनुजेन प्रागा
त्मनो विवाहं कुर्वता योऽतिक्रांतः स परिवित्तिः। स प्राजापत्यं चरित्वा कनीय

सा पूर्वपरिणीतां तेन दत्तामुद्वहेत्तस्यैव सा भार्या नानुजस्या।शास्त्रीयत्वात्तद्वि
वाहस्य। अनुजश्च स्वक्रमेण विवहन्परिविंदन उच्यते परिवेत्ता च। सोऽमत्या
चेत्तदा द्विचैकं कृत्वा स्वोढां ज्येष्ठाय दत्त्वा पुनरन्यामुद्वहेत्॥ पश्चात्तामेव ब्रह्म
चर्याहृतभैक्षवद्गुरुपरिभवपरिहारार्थं निवेद्य पुनस्तेनानुज्ञातामुद्वहेत्। म
त्या चेत्त्रैमासिकं॥ अकामतश्चेत्कृच्छ्रातिकृच्छ्रौ कृत्वैवं कुर्यात्॥ इदं च कन्या
पित्रादिदत्तोद्वाहे॥ तत्पित्राद्यपरिज्ञाने ब्राह्मप्राजापत्यादि कृत्वैवं कुर्यात् देशां
तरस्थिते ज्येष्ठे कृतविवाहोऽसाविति भ्रांतिरमतिः। परिवेत्तुरद्धि विषये
परिविन्नस्य ज्येष्ठस्य द्वौ कृच्छ्रौ परिवेदनीयायाः कन्यायाः कृच्छ्रः। दातुपरिहा
यिनः कृच्छ्रातिकृच्छ्रौ। परिकर्ता हि तथाजकस्तस्य चांद्रायणं॥ इदं निर्गुणे
ज्येष्ठे। गुणवति ज्येष्ठे तु द्विपूर्वं परिवेदने परिवेत्त्रादयः परिकर्त्रंताः सर्वे पति
ताः संवत्सरं प्राजापत्येन शुध्येयुः॥ एवं ज्येष्ठायामनूढायां या कनिष्ठा वि
वाहिता साऽग्रेदिधिषूः ज्येष्ठानु दिधिषूः॥ तत्राग्रेदिधिषूः पतिः कृच्छ्रं कृ

कृत्वापुनस्तामेवोद्वहेत् ॥ दिधिषूपतिस्तु कृछ्रातिकृछ्रौ कृत्वास्योढां ज्येष्ठां क
नीयस्या वोढ्रे दत्वान्यामुद्वहेत् इति विज्ञानेश्वरादयः ॥ कनीयस्या वोढ्रे दत्वा
तस्मै न त्वा पुनस्तेनानुज्ञातस्तामेवोद्वहेत् इति स्मृत्यर्थसारोऽनाहिताग्नो
ज्येष्ठे कनीयानादधीत चेत्तस्य यो धाता कनिष्ठज्येष्ठः पर्याहितः । तयोः संवत्स
रव्रतं । इदं कामतो ज्ञात्वा करणे । अन्यथार्धम्बोध्यं ॥ क्लीबकुवृषणपति
तविरक्तसन्न्यस्तातिरोगिजडमूकगद्गदबधिरकुब्जवामनपादद्वयहीनाति
वृद्धं तस्करविवाहानिच्छुरन्ध्रतुल्यमृतभार्याणां परिवेदने न दोषः ॥ एवं
वेश्याधनकृष्णासक्त्या विवाहानिच्छुपरिवेदनेपि न दोषः । धनधर्मविद्यार्थं
देशांतरस्थे द्वादशवर्षप्रतीक्षा ॥ कार्यांतरार्थं तस्येदश ॥ इति वेदनम् ॥ ॥
अथ भृतकाध्यापनोद्दे ॥ पणपूर्वोध्यापकादध्ययनग्रहणं भृतकाध्य
यनम् ॥ पणपूर्वाध्यापनं च भृतकाध्यापनम् ॥ तत्कर्तारो पयसा ब्राह्मीं
सुवर्चलां त्रीन्पक्षान्नियत पिबेत् ॥ कालशक्त्याद्यपेक्षया चांद्राद्विषे

कं।अनुयोगप्रदानेप्येवं॥उत्कर्षहेतोरधीयानस्यकिंपठसिनाशितंत्व
येतिपर्यनुयोगप्रदानं॥वेदपारायणंवा॥अनुयोगंयःप्रदानाभ्यासेपाति
त्यमित्याहुः॥ ॥अथपारदार्ये॥पारदार्यंचमहापातकतदातिदेशिक
तत्समव्यतिरिक्तपरदारगमनरूपं॥तत्रपुरुषांतरासंबंधाव्यभिचरितजाति
मात्रविप्रामतोगत्वाविप्रोवार्षिकब्रह्मव्रतंधर्मकर्मशालित्वादिगुणशा
लिनींतादृशींगत्वाविप्रस्तुद्विवार्षिकंततः॥श्रोत्रियपत्न्यांतादृश्यांत्रिवार्षि
कंततः॥ताभिर्यदिद्वयंदत्तंभवेत्तर्हितत्समुत्कृष्टव्यांद्वित्रिचतुर्वारगम
नेक्रमेणद्वित्रिचतुर्गुणं॥अन्त्यगमनेचपातित्यं॥एवंद्वितीयात्तृतीयादिगम
नेपि॥एकस्यामेवद्वित्रिवारादिगमनेपूर्वोक्तमेवपादपादहान्येतिशूल
पाणिमिताक्षरादयः॥क्षत्रियादीनांस्वस्वसवर्णागमनेपादपादहानिः॥
विप्रस्यक्षत्रियादिस्त्रीषुद्विवार्षिकवार्षिकषाण्मासिकंगुणवतीषु॥शू
यां द्रस्यशूद्र्यांपरकीयांषाण्मासिकंगुणवत्यां॥अकामतःपुनरेतदेवार्धं।

स्वभर्तृव्यतिरिक्तस्वसवर्णैकपुरुषगामिन्यां गंतुः पूर्वोक्तमेव पादहान्या॥
पुरुषद्वयगामिन्यां द्विपादहानिः। पुरुषत्रयगामिन्यां त्रिपादहानिः। पुरु
षचतुष्टयगामिन्यां त्र्यहोपवासपूर्वकं घृतपात्रदानं॥ क्षत्रियायामुप
वासत्रयपूर्वकमाढकपवदानं। वैश्यायां चतुर्थकालाहारस्य विप्राणां
भोजनं॥ शूद्रायां सचैलस्नानपूर्वकमुदकुंभदानं॥ पंचमादिगामिन्या
मष्टमुष्टिधान्यदानं। तादृश्यां शूद्रायां विप्रस्योदकुंभदानं॥ क्षत्रियायां
धनं॥ वैश्यायां वस्त्रं। अभ्यासे आवृत्तिः। विप्रादेः क्षत्रियादिगमने ऽप्ये
वार्धार्धादिहानिरिति गौडाः॥ अन्ततो जातिमात्रविप्रां विप्रो गत्वा मा
नैवं त्रैमासिकं कुर्यात्॥ ईदृशक्षत्रादिस्त्रीषु द्वैमासिकचांद्रमासिकानि॥
क्षत्रियादीनां स्वसवर्णासु द्वैमासिकान्येव। अमसार्धम्॥ आसु गर्भो
त्पत्तौ तु तद्विषये उक्तमेव। शूद्र्यां गर्भोत्पत्तौ तु त्रीणि वर्षाणि चतुर्थका
लेनान्नं भुंजीत। विप्रस्यानिच्छतीषु विप्रादिषु क्रमेण गोघ्नत्रैमासिकद्वै

६

मासिकं चांद्रं मासिकं नि ॥ गोभिन्नासु तिर्यग्योनिषु गमने सचैलस्ना
नं गोभ्यस्तृणभारदानं । कामतस्तु त्रैमासिकं गोघ्नव्रतं तथाभ्यासे प्राजा
पत्याधिकमिदं ॥ अत्यंताभ्यासे संवत्सरव्रतं कामत आजन्मासंताभ्या
से गुरुतल्पगसमं । रजकचर्मकारबुरुडकैवर्तनटमेदभिल्लाः सप्तांत्याव
सायिनः तत्स्त्रीषु व्याधशैलूषवेणुजीविकापालिकम्लेंछादिस्त्रीषु च वि
प्रस्य कामतः सकृद्गमने चांद्रद्वयं । अमत्या पराकश्चांद्रं वा । रेतःसेकास्ना
द्विवत्सौ कार्यं । अभ्यासे आवृत्तिः । आस्वेव कामतोऽष्टधा गमनाभ्यासे कृ
च्छ्राब्दं । अज्ञानात्तथाभ्यासे चांद्रद्वयं ॥ गर्भोत्पत्तौ त्रिवार्षिकं । अज्ञानत
आसु चतुर्विंशतिवारगमनात्पातित्यं ॥ ज्ञानतस्तदर्धादीति गौडाः ॥
संवत्सरादर्वाग्ज्ञानतो द्वादशधा । ज्ञानतश्चतुर्विंशतिधाभ्यासे द्वौ मासौ
भैक्ष्यभुग्द्वौ यावकभुगेवं षण्मासाच्छुध्यति ॥ अंत्यजावच्छौंडिकादि

स्त्रीषुअमत्यासकृद्वक्ष्यमाणलक्षणचंअत्यादिस्त्रीगमनेषडब्दं ।गर्भो
त्पत्तौद्वादशवार्षिकं ।ज्ञानतस्त्वग्निप्रवेशादिनामरणमेवाक्षत्रियादीनां
पादपादहानिः ॥ज्ञानेतुसर्वेषांमरणमेव ॥ अनुपनेतृभ्रातृजायायामत्या
सकृद्गमनेचांद्रं ॥ मत्याशा क्रिया ।सिद्धेर्निवृत्तौच ।मत्याक्रियासिद्धिपर्य
न्तगमने ॥ मत्याभ्यासेचसंवत्सरं विप्रकुलेभैक्ष्यं ॥ मत्याभ्यासेतुगुरुतल्प
वत् ॥ एतदेवानुपनेतृपितृव्यमातुलजाययोः ॥ विधवासुरेपस्त्रीषुग
मनेकृच्छ्राधिकंतत्तत्प्रायश्चित्तम् ॥ आसुरजस्वलासुगमनेप्रकीर्णक
प्रकरणोक्तरजस्वलाप्रायश्चित्तेस्सहैषांसमुच्चयः ॥ तत्राप्यधिकेनन्यू
नस्यप्रसंगात्सिद्धिः ॥ साम्येतुतंत्रं ॥ यत्तुरजस्वलागमनमनुपातकमिति
तत्ताहश्यांश्रोत्रियपत्न्यांकामतोभ्यासे ॥ ॥ अथस्त्रीणाम् ॥ यत्पुंसःप
रदारेषुतच्चैनांचारयेद्व्रतमिति ॥ स्त्रीणामर्धमितितुस्त्रीपुंससाधारणव्र

तोपदेशाविषयं ॥ इदं च समानेषु सर्ववर्णेष्विच्छापूर्वकव्यभिचार एव । अनिच्छं
त्यास्तु मलिनाया अधःशयनायाः पिंडमात्रोपजीविन्या गृहे भर्त्रारुत्समव
रुद्धायाः कृच्छ्रः पराको वा शक्त्यपेक्षया । अकामतो ब्राह्मण्या अज्ञानतो वैश्य
क्षत्रियगमने मासं तदर्धं वा गोमूत्रयुतयावकपानं ॥ ज्ञानतस्तु सकृच्छ्रं चांद्र
द्वयं सकृच्छ्रमेकं तच्च क्रमेण । अनिच्छंत्याः स्वपतिभ्रांत्या वा शूद्रगमने रेतः
सेकात्प्राङ्निवृत्तौ सकृच्छ्रं चांद्रं रेतःसेके सकृच्छ्रं चांद्रत्रयं क्षत्रवैश्याभ्यां बुद्धि
पूर्वकं गर्भपर्यंताभ्यासेनिच्छया ततः प्रसवे च कृतचिह्नाया निर्वासनं । शूद्र
विषये त्विच्छया संगमे गर्भानुत्पत्तावपि अनिच्छयोत्पन्नेस्यस्त्रावेपि च तथाक
रणं ॥ तादृक् क्षत्रिया वैश्यसंगमे सकृच्छ्रं चांद्रायणं । शूद्रसंगमे सकृच्छ्रं तद्द्व
यं । वैश्यायास्तादृश्याः शूद्रसंगमे सकृच्छ्रं चांद्रं । शूद्रायाः शूद्रगमने प्राजापत्यं ।
क्षत्रियाया विप्रक्षत्रियवैश्यगमनेष्वर्धैकायकायातिकृच्छ्राणि ॥ वैश्याया वि
प्रक्षत्रियवैश्येषु कृच्छ्रपादकृच्छ्रार्धकायानि । शूद्रायाः शूद्रेकायं । विक्षेप्रेत्रि

यवैश्येषु त्वहोरात्रार्धवृद्धकृच्छ्राणि ॥ विप्रायागर्भोत्पत्तौ तत्प्रसवे क्षिप्रगर्भे
पराकः । क्षत्रियगर्भे चांद्रं ॥ वैश्यगर्भे पराकचांद्रे । अकामतश्चेत्स्यागुरुत्वं चा ।
यदा तु शूद्रगर्भात्प्रसूः पतेत तदा त्यागः पतितत्वात् । गर्भस्रावे च पाते च चरेच्चां
द्रायणत्रयं कामतो द्विगुणं । एवं क्षत्रियावैश्ययोः पादपादन्यूनं यदा तत्ता
हितगर्भा एव व्यभिचरंति तदा गर्भबाधशंकया दश मासोत्तरं प्रसवे प्राय
श्चित्तमाचरेयुर्गर्भस्य तु न दोषः ॥ तच्च मासं यावत्कृच्छ्राणां यदात्वोद्भुत्सा
स्त्रायश्चित्तं नेच्छंति तदा तासां नासाकर्णादिकर्तनं यदा विप्राप्रागुक्तान्न
जकादीन् कामतो गच्छेत्तदा चांद्रत्रयं । चंडालाद्यंत्यावसायिगमने तत्तत्त्व
तुल्यं । मत्या द्विगुणं । रेतःसेकात्प्रागस्या निवृत्तौ चांद्रमेवागर्भिण्याः पश्चाद
त्यजसंगमे तु प्रसवोत्तरमेव प्रायश्चित्तं ॥ तदनुष्ठानं यावत्पृथगेव तिष्ठे
न्गृहे प्रचरेत् ॥ साकृच्छ्राब्दं चरेत् ॥ हिरण्यं वासो धेनुर्दक्षिणा । कामतो मत्या
त्यंतसंसर्गे तु मरणान्तशुद्धिः । गर्भे च त्याग एव । प्रायश्चित्ताकरणे तु पुंलिं

गेनांकनीयावध्यावा ।अनिच्छंत्याबलाद्दानुलोम्येनव्यवायेत्वधमूः ।। द्वि
भोगेपराकः ।। त्रिरेदंवंरेतःसेकात्स्याछ्रिःस्तात्वुपवासत्रयं । एवंवंद्विग्राहंगृ
हीत्वाबलाद्भुक्तायाःसांतपनंतथांत्यजाद्युपभोगाभ्यासेत्यागः ।मनसा
भर्तुरभिचारेत्रिरात्रंक्षीरोदनभोजनमधःशय्याततऊर्ध्वमप्सुनिमग्नायाघ
र्त्रिंशदधिकंचतुःशतीगायत्रीमंत्रेणसेकः ।। वाचाभिचारेमासंक्षीरोदन
मन्यत्पूर्ववत् ।। रजोदर्शनेतुलेनैवशुद्धिः ।। प्रायश्चित्तोपदेशस्तुरजोद
र्शनात्प्राग्भवहार्यत्वसिद्धये ।। पतिघ्न्याः ।। शिष्यगुर्वादिगर्भायाःकृत
चिन्हायागृहान्निर्वासनमेव ।। इदमपिप्रसवएवनस्त्रावादौ । अन्यगायास्तु
यावत्प्रायश्चित्तंगृहेनिरोधएवाशूद्रस्यविप्रागमनेवीरणकुशवेष्टितस्या
ग्नौदहनंविप्रायास्तुवपनंकारयित्वासर्पिषाभ्यज्यनग्नांखरमारोप्यराज
मार्गेव्राजयेत् ।। ततःपूता । वैश्यश्चेल्लोहितदर्भवेष्टितस्याग्नौप्रासनंवि

माया: प्राग्वत् ॥ प्रसवएवेति केचित् ॥ क्षत्रियस्य शूद्रापत्वैत्रैवैंष्टितस्यत
त् ॥ विप्राया: पूर्ववत् ॥ एवं वैश्यस्य राजन्यायां शूद्रस्य राजन्यावैश्ययो: ॥
ज्ञानत: कामतद्दौ अकामत: स्वभार्याभ्रांत्या शूद्रस्य विप्रागमने द्वादशवा
र्षिकं ॥ वैश्यस्य नव क्षत्रियस्य षट् ॥ एवं शूद्रस्य क्षत्रियावैश्यागमनेनवष
ड्वार्षिकं ॥ वैश्यस्य क्षत्रियागमनेपि षट् ॥ एतदपि गर्भानुत्पत्तौ द्विगुणं ॥
शूद्रस्यात्यंतव्यभिचारे तु विप्रागमने मासं गोमूत्रयावकाहारता वैश्यक्षत्रि
ययो: कृच्छ्रसांतपने ॥ इति पारदार्यम् ॥ कनीयसि कृतविवाहे ज्येष्ठस्य विवा
हराहित्यं पारिवित्त्यं तद्ध्यन्यपरिवित्ति: ॥ तत्प्रायश्चित्तं परिवेदनप्रकरण एवोक्त
म् ॥ वार्धुष्यं निषिद्धवृद्ध्युपजीवनं तत्र चांद्रादिष्वेकं त्रैमासिकं च शक्तिगुणा
द्यपेक्षया योज्यं ॥ लवणे ॥ स्यादनं लवणक्रिया तत्राप्येवं ॥ ॥ अथ स्त्रीशूद्रवि
ट्क्षत्रवधे ॥ तत्रानात्रेय्यगर्भिण्या: स्त्रिया वध: स्त्रीवध: ॥ कामतो गुणव

९

तरविप्रावधे विप्रस्य षड्वार्षिकं ब्रह्महव्रतं। क्षत्रियावैश्याशूद्रावधे तु दर्धं त
दर्धं तदर्धानि ॥ अमत्या चेत दर्धं। सपत्नमातृष्वसृभगिनीस्नुषाभार्याघाति
मसन्नगुणवत्तरावधेप्येतदेव। निर्गुणात्तरसपत्नभगिनी पितृष्वसृमातृष्व
सृमातुलानी पितृव्यजाया भ्रातृजाया श्वश्रूवधे एतदेवपादोनं निर्गु
णतरस पिंडासगोत्रावधेऽर्धं ॥ आसामेवाग्निहोत्रिश्रोत्रियपत्नीत्वादिगु
णविशेषे द्विगुणं। गुणार्धनामस्ताधिक्ये प्रायश्चित्ताधिक्यं ॥ सवर्णासवर्ण
व्यभिचरित विप्रादिवधे वर्षं भैक्षादशगोरूपदक्षिणासहितसंवत्सरव्रत
गोदानसहिताब्दार्धं तिलधेनुसहितसांतपनधेनुद्वयदानानि क्रमेण ॥
एतदेव तत्तद्वर्णजातशूद्रवधे। इदं कामतः ॥ अकामतोऽर्धं। असवर्णासवर्ण
व्यभिचरितास्वप्रसूतास्वर्धं। प्रातिलोम्येन व्यभिचरितविप्रादिवधे तु गोवधो
क्तं यथार्हयोज्यं। प्रातिलोम्ये नासंतव्यभिचरितत त्प्रसूतानां विप्रादीनां
वधे क्रमेयाचमर्धं धनछागमेषदानम् ॥ चर्मात्रतन्मयं जलभांडं ॥ अश्वपृष्ठा

रोप्यमाणं चर्मनिर्मितं जीवनं । इदमज्ञानतो ज्ञानतो द्वैगुण्यं मत्वा वद्ध तुर्थैकमासाः ॥ प्रसूतादीनां वधे चैवमिति स्मृत्यर्थसारे । अप्रसूतासु किंचिदधिकं । आनुलोम्येनाख्यं तव्यभिचरितासु ततोपि किंचिदधिकं ॥ वैश्याक्रमेणाजीवंत्या विप्रादिकायां हतायां किंचिज्जलदानं ॥ जलस्य स्पर्शमात्रमिति अन्ये । पतिहननशूद्रगमनादिभिरतिप्रदुष्टविप्रादिवधे तु न किंचित्प्रायश्चित्तं विपरीतं पुण्यमेवेत्याहुः ॥ जातिमात्रक्षत्रवैश्यशूद्रवधेषु क्रमेण त्रैवार्षिकनवमासिकानीत्यन्ये । अमत्येदं । मत्याद्विगुणं । क्षत्रियादिकर्तृके एतद्वधे पादपादहानिः । प्राच्यास्त्वमत्या जातिमात्रक्षत्रवधेन वकृच्छ्राणि । तादृग्वैश्यवधे चत्वारि । शूद्रवधे द्वयं ॥ ज्ञानतो द्वैगुण्यमित्याहुः ॥ नृपतिवधे द्वादशवार्षिकम् ॥ प्रयोजकादीनां पादपादहानिः ॥ अत्र सर्वत्र शवशिरोध्वजत्वावश्यिका ॥ कामतः सकृत्प्रतिलोमसूतवधे चांद्रं । वैदेहकवधे पादोनं चांडालवधे द्विपाद ॥ मागधवधे पादोनं क्षत्रयोगवयोर्द्विपादं । अज्ञानतोर्धं । चंडाला द्विगुणसं

मंस्यजातेतस्त्रीवधे च षड्रात्रमुपवासो तिलदानं चेत्याहुः ॥ चोराणामेषांवधे
एकोपवासपूर्वकंघृतप्राशनम् ॥ ॥ अथान्यहिंसायाम् ॥ तत्रास्थिमतांकृ
कलासादीनामनुक्तप्रायश्चित्तानां सहस्त्रवधे एकोपवासपूर्वकंघृतप्राश
नम् ॥ ॥ अथान्यहिंसायाम् ॥ तत्रास्थिमतांकृकलासादीनामनुक्तप्रा
यश्चित्तानां सहस्त्रवधेऽनस्थिमतां क्षुद्राणांजलौकायूकामत्कुणदंशादी
नां शाकटपूर्णवधे कृमिकीटपतंगपिपीलिकाभ्रमरदंशमक्षिकाणां सहस्त्र
वधाभ्यासे चेषाण्मासिककृच्छ्रव्रतं दद्याधेनवो वा परिमाणाधिक्ये प्रायश्चि
त्ताधिक्यम् ॥ इतोल्यपरिमाणवधे मलिनीकरणत्वाश्रहुं तत्पापावकपानां
अमत्याल्पेतद्वधे घुणादिवधे च किंचिद्देयम् ॥ अष्टमुष्टिधान्यं किंचित् ॥ त
तोप्यल्पे क्षुद्रत्तमे च प्राणायामः ॥ फलपुष्पधान्यानां तरसंजातप्राणिवधा
भ्यामेविनमे कंघृताहारः ॥ क्षत्रियादीनां पादपाददानिः ॥ कृकलासादि
सहस्त्रवधे जलौकादिशाकटवधे च तत्पकृच्छ्रम् ॥ अभ्यासे प्रागुक्तमि

तिगोजः ।मार्जारगोधानकुलमूषकमंडूककुक्कुटचाषकाकोलूकछछुंद
र्यादीनां प्रत्येकं वधे पादकृच्छ्रं ॥ पयस्त्रिरात्रं वा ॥ एकवर्षवत्सदानं वा ॥ मत्स्यादि
गुणं ॥ अभ्यासे आवृत्तिः ।असभ्यासे कायांससमुद्दिलवधाभ्यासे षाण्मासिकं
शूद्रवधव्रतं कपालधारणादिकं नास्ति ॥ दशधेनुदानं वा । कोकिलकपोत
शुककपिंजलटिट्टिभखंजरीटानां पुरुषभारवधेप्येतदेवा गजवधे पंच नी
लवृषदानं हयवधे वस्त्रयुग्मं ।उष्ट्रे गुंजाभारः । स्वर्णगुंजा वा ॥ खरे वृष एक
वर्षः ॥ अजमेषयोरप्येवं अत्र निर्धनस्याभ्यासे त्रिरात्रमुपवासः ॥ असं
ताभ्यासे सप्तरात्रं हंससारसपारावतमयूरचक्रचटकबलाकाविषरकंक
श्वाविल्कारंडवश्येनभासराजपक्षिकुररकपिगृध्रबकादिजलचरवधे गो
दानं ॥ तत्र काकोलूककपोतंकुक्कुटबहसस्थ्यादिषु त्रिवर्षः शुकचाषखंज
रीटलावकसारिकादिषु द्विवर्षः ॥ टिट्टिभतित्तिरिमद्गुडिकादिषु क्षुद्रेष्वेकवर्षः ॥
क्रव्याद्व्याघ्रसृगालादिवधे वानरहंसश्येनकंकगृध्रादिषु जलचरबलाकादि

पक्षिषु स्थलचरबकादिषु भासे मयूरे च प्रत्येकं वधे धेनुर्देया ॥ अक्रव्याद्धरिणादिमृगेषु खंजरीटादिपक्षिषु च वत्सतरी ॥ सर्पादिसरीसृपेषु अपो दंडस्तीक्ष्णोभयाग्रः ॥ यद्वा शुके द्विवर्षो वत्सः ॥ क्रौंचे त्रिवर्षः ॥ महिषादिवधे वत्सतरी ॥ वराहघृतकुंभः ॥ तित्तिरौ तिलद्रोणः ॥ नपुंसकमृगपक्ष्यादिवधे माषकं सीसं ॥ पलालभारो वा ॥ दानाशक्तौ तु स्मृत्यर्थसारे ॥ गजाश्वोष्ट्रखरगोरगवर्क्षीयेमहिषमेषादिषु मत्या प्रत्येकं वधे सार्धकृच्छ्रः ॥ समस्तवधे चांद्रं ॥ मत्या प्रत्येकवधे च ॥ समस्तवधे त्वावृत्तिः ॥ हरिणसारंगरुरुवराहसिंहगंडकेसरव्याघ्रमकरमहामत्स्यग्राहशिंशुमारादीनाममत्यावधे प्रत्येकं कृच्छ्रः ॥ समस्तवधे तप्तं ॥ मत्या प्रत्येकं वधे चा॰ समस्तवधे चांद्रं ॥ श्ववृकवानरजंबूकविडालोद्रराहादिषु मत्या प्रत्येकं त्रिरात्रं ॥ समस्तवधे कृच्छ्रः ॥ मत्या प्रत्येकं वधे च ॥ समस्तवधे द्विगुणं चा ॥ मार्जारसर्पाजगरडुंडुभनकुलमंडूकमूषककर्कटशलभसेधागोधाशल्यककूर्मशशादिषु मत्या प्रत्येकं वधे पादकृच्छ्रः ॥ समस्तवधे त्वर्धः ॥ मत्या प्रत्येकं च समस्तव

धेकृच्छ्रः ॥ हंसादिषु मत्याप्रत्येकं वधे कृच्छ्रः ॥ गृध्रादिषु पादन्यूनः । शुकादि
ष्वर्धः ॥ मत्याद्विगुणं टिट्टिभादिषु पादः समस्तवधादौ द्विगुणं हरिणादिषु हंसा
दिषु च हंतव कृच्छ्रत्वे प्रत्येकं त्रिरात्रं । श्वादिषु गृध्रादिषु त्र्यहं ॥ मार्जारादिषु शु
कादिषु चोपवासः । टिट्टिभादिषु नक्तं ॥ मत्स्यमायेषु मत्साप्रत्येकं वधे तु
गजादिषु त्रिरात्रं ॥ हरिणादिषु त्र्यहं ॥ खरादिषु चतुर्थकालः । मार्जारादि
षूपवासः ॥ गृध्रादिषु नक्तं । टिट्टिभादिषु जले प्राणायामः ॥ अविज्ञान
सर्वमृगपक्षिषु त्रिरात्रमिति ॥ इति स्त्र्यादिवधः ॥ अथ द्रुमच्छेदे ॥ वृक्षगुल्म
लतागुच्छक्षुपप्रतानौषधी । वीरुधां फलपुष्पादिभिरुपयोगिनां यस्ताघ
दृष्टार्थं विनाच्छेदे शतगायत्रीजपः ॥ गुल्मा मालत्यादयः ॥ लता द्राक्षाद
यः ॥ गुच्छा कुरंटकादयः ॥ क्षुपा करवीराद्यः ॥ प्रतानास्यारिवाद्याः ॥ औ
षध्यः शाल्याद्याः । वीरुधो गुडूच्यादयः ॥ इदमकामतो । सकृच्छेदने ॥ का
मतः सकृच्छेदने च ॥ ग्राम्यारण्यौषधिच्छेदनास्यं ताभ्यासे दिवा गोपरिचर्या

कृत्वा रात्रौ क्षीरं पीत्वा वसेत् कामतोभ्यासेऽकामतोसंताभ्यासे च वृक्षगुल
तादिविषयेर्धं कृच्छ्रः ॥ फलवतां प्राजापत्यं । कृष्याद्युपकरणादिदृष्टार्थं यज्ञा
द्यदृष्टार्थं च छेदनेन दोषः । महाफलप्रदनारिकेलादिवृक्षाणां कामतश्छे
दनासंताभ्यासे संवत्सरव्रतं ॥ सकृत्कृत्वात् द्विगुणो जयः ॥ एवं चैत्यश्मशान
सीमापुण्यस्थाने देवालये स्थे वृक्षेऽन्यस्मिन्प्रख्याते वा छिन्ने वृक्षे वो
ध्यं ॥ शूद्रस्य तु दंडानुसारेण द्विरात्रादि कल्प्यम् ॥ इदं चापरिगृहीतविषयं ॥
छित्वा परिगृहे तु दंडाधिक्यप्रदर्शनात्प्रायश्चित्तादितिरेको बोध्यः । काम
तोसंताभ्यासे चांद्रादि विवेकं ॥ इति द्रुमछेदः ॥ अथ प्रसंगाच्छ्वादिदंष्ट्रा ॥ श्वव
कसृगालखरोष्ट्रविड्वराहादिक्रव्यादिभिः ॥ काककुक्कुटवानरपुंश्चलीभि
रहितस्त्र्यश्चेन्नाभेरूर्ध्वं ईषद्दष्टस्तथो नीलीकाष्टक्षतश्च विप्रो जलेप्राणायाम
त्रयपूर्वकघृतप्राशनाच्छुध्यति ॥ अहारांतरनिवृत्तिरस्त्रासरुधिरदंष्ट्रे षोड
शप्राणायामाः ॥ अन्यत्पूर्ववत् ॥ अत्र रात्रौ ब्रह्मचारिणस्त्र्यहं सायं दुग्ध

पानमेवगृहस्थस्यस्यघ्यहं ।। अग्निहोत्रिण एकाहं नाभेरूर्ध्वं दष्टस्येदमेव
द्विगुणं । वक्त्रे दष्टस्य त्रिगुणं मस्तके चतुर्गुणं । मार्जारमूषकनकुलाज
महिषेर्हिनिजान्यारण्यमगैश्च दष्टे जले दशप्राणायामाः । नाभेरध ईषद्दष्ट
स्य पंचाक्षत्रियादेः पादपादन्यूनं शूद्रस्यामंत्रकाः प्राण्यायामाः । उपवा
सादेवास्यशुद्धिरित्यन्ये ।। स्त्रीणां तु दष्टानां स्नात्वोदितनक्षत्रदर्शनाच्छु
द्धिः ।। वृकघ्रादिव्रतस्थायां दंशे तु त्रिरुपवासपूर्वकं चतुर्थे घृतपावक
भोजनं ततो व्रतशेषसमाप्तिः ।। व्रतस्थस्य पुंसोप्येतदेव जपाद्यधिकं
प्राणायामादिश्च रजस्वलायाः श्वादिदंशे तु पंचोपवासपूर्वकं षष्ठे
पंचगव्यपानं नाभेरूर्ध्वं तु प्रागुक्तक्रमेण द्वित्रिचतुर्गुणादिर्बोध्यं ।।
अत्यसमर्थस्य दिवादष्टस्यानक्षत्रादभोजनं । रात्रिदष्टस्यासूर्यात् ।।
गायत्रीशतजपो वा पदस्तु श्वादिदंशजे शस्त्राघातादिजे वा व्रणे कृम
य उत्पद्यते तदा गव्यमूत्रपुरीषाभ्यां त्रिसंध्यस्नानं त्रिरात्रं पंचगव्याशनं

५२

चान्द्राभेरूर्ध्वं कंठादधः षड्रात्रं शिरोव्रणे कार्यम्॥ युगपदनेकव्रणेषु कृ
स्युस्तत्रोसांतपनं वृषभश्च दक्षिणा। इदं च श्वादिदंशनिमित्तप्रायश्चित्तस
हितमेवाशस्त्रादिव्रणेषु केवलमेव एतत्॥ क्षत्रियादीनां पादपादह्रासः॥
अन्यव्रणे कृमिदोषे तूपवासो हिरण्यं च दत्वा कृछ्रेण शुद्धिः॥ शास्त्रोक्तोपा
यार्जितादर्थांतरेण जीवनं निंद्यार्थजीवनं तत्र चांद्रादिष्टेकं त्रैमासिकं च जा
तिशास्त्याद्यपेक्षया॥ नास्तिक्यं वेदनिंदनं तेन जीवनं च परलोको नास्तीत्य
भिनिवेशश्च॥ तत्र सकृत्कृते कृछ्रः॥ तेन जीवने तिकृछ्रः॥ अज्ञानतो धर्म॥
सानतोभ्यासे चांद्रादिष्टेकं॥ असंताभिनिवेशेन बहुकालाभ्यासे श्री ग्रीष्मव
र्षाहेमंतेषु क्रमेण घर्माभ्रावकाशजलशायानः पंचाब्दं विप्रगृहेषु भैक्ष्यं वा॥
अथ व्रतलोपे॥ स च ब्रह्मचारिण स्त्रीसंगमः देवताराधनाद्यर्थं गृहीतव्रतलो
श्च पप्रायश्चित्तार्थं प्रक्रांतकृछ्रादिव्रतच्युतिश्च। किंच व्रतसंकल्पः स्नातकव्र
तादि च तस्य मिथ्याकरणं त्यागश्च सः॥ शिष्टाप्रतिषिद्धस्य भोजनव्यीत

रेकेणमयाजलंनपातव्यमित्यादिनियमस्यसागश्चात्रकालदेशशक्तिब
हुत्वाल्पत्वादिपर्यालोच्योपपातकसामान्यप्रायश्चित्तानियोज्यानि ॥ अवकी
र्णितारूपतद्विशेषेतूच्यते । तत्रगुरुतल्पतत्समान्यस्त्रियंगत्वानैर्ऋतदेवते
नैकाक्षगर्दभोनपशुनारण्येचतुष्पथेरात्रौलौकिकेग्नौपाकयज्ञधर्मेणाश्वला
यनादिगृह्योक्तपशुकल्पतंत्रेणेष्ट्वातस्याजिनमूर्ध्ववालंपरिधायत्रिषवण
स्नायीलोहितपात्रःस्वकर्माचक्षाणःसप्तगृहेभैक्ष्याणिकुर्वन्नेकवाराशीव
र्षेणशुध्येत् ॥ एवमशक्तौतुनैर्ऋतंचरुंनिरुप्यपक्त्वाकामायस्वाहाकामकामा
यस्वाहानिर्ऋतयेस्वाहारक्षोभ्यःस्वाहादेवताभ्यःस्वाहेतिहुत्वाहोमशेषं
समाप्याद्वव्रतंचरित्वाशुध्येत् ॥ इदंचाश्रो । त्रियवैश्यपत्न्यांचसेयांयद्वातुगुणव
त्योःश्रोत्रियपत्न्योर्विप्राक्षत्रियपयोरवकीर्णितेत्रिवार्षिकंद्विवार्षिकेहोम
श्च ॥ अमत्यावकिरणईषद्व्यभिचारिण्यांचलत्वेषण्मासंब्रह्महत्याव्रतंचीरवा
साश्चरेत् ॥ द्विवार्षिकादिष्वमसाधर्म ॥ अत्यंतव्यभिचरितशूद्रायांवैश्यायांच

हा

सचैलस्नात्वा तस्योदकुंभदानं ताडग्वैश्यायां चतुर्थकालाहारो विप्रान्भोजये
त् यवसभारं च गोभ्यो दद्यात् ॥ ताडक्क्षत्रियायां त्रिरात्रोपोषितस्य घृतपा
त्रदानं ॥ ताडग्विप्रायां षड्रात्रमुपवासो गोदानं च । गोष्ववकीर्णः कार्यं । षंढाव
कीर्णस्य पललभारसीसमाषयोर्दानं स्त्रीसंभोगमंतरेण मत्या रेतो विसृज्य
नैर्ऋतयागमात्रं दिवास्वप्ने तदुत्सर्गे चैवं वा कृच्छ्रचांद्रादि वा इति दिष्टं ब्रह्मचर्ये
षु रेतस्कंदनेप्येवमेव रात्रौ स्वप्ने रेतःस्कंदने ब्रह्मचारी स्नात्वार्कमर्चयित्वा
पुनर्मामैत्विंद्रियमित्यृचो गायत्रीं वा त्रिर्जपेत् ॥ अष्टाधिकशतं जपेदित्यन्ये ॥
वानप्रस्थयत्योर्मत्या ब्रह्मचर्यलोपे पराकत्रयमुक्तमवकीर्णिव्रतं ॥ अमत्या कृ
च्छ्रत्रयमुक्तं ॥ प्रसंगादुच्यते ॥ ब्रह्मचारिण अनातुरस्य गुरुशुश्रूषादिगुरुत
रकार्यव्यग्रतया सप्तरात्रं भैक्षस्याग्निकार्यस्य वा लोपे कामावकीर्णोस्म्य
वकीर्णोस्मि कामकामाय स्वाहा ॥ कामाभिद्रुग्धोस्म्यभिद्रुग्धोस्मि कामाय स्वा
हा इत्याज्याहुतीर्हुत्वा सं मा सिंचतु मरुतः समिंद्रः सं बृहस्पतिः ॥ सं माय

मग्निः सिंचत्वायुषा च बलेन चेत्यनेनोपतिष्ठेत्॥ अव्य्रतयातल्लोपेवकीर्णि
व्रतं सप्तरात्रं तदित्यन्ये॥ मणिवासोगवादीनां प्रतिग्रहेष्टसहस्रगायत्रीजपः॥
उपनयनानंतरं व्रतमध्ये मेखलायज्ञोपवीतदंडादीनां नाशे वस्त्रं सूत्रं तदंवा
धृत्वा मनोज्योतिरित्यादिमनोलिंगाभिस्त्वमग्नेव्रतपाअसीत्यादिव्रतलिंगा
भिश्चतस्र आज्याहुतीर्हुत्वोपनयनोक्तविधिना धारयेत्॥ असमर्थस्त्वभो
जने सुप्तोदितेसु मास्तमिते चवांते दिवास्वप्ने नग्नस्त्रीदर्शने नग्नस्वापे श्म
शानाक्रमणहयाद्यारोहणपूज्यातिक्रमेषु चैताभिर्जुहुयात् यज्ञोपवीतं
विना तद्न्यथा कृत्वा वा भोजने विण्मूत्रोत्सर्गे वा गायत्र्यष्टसहस्रजपः॥
पाने त्रिः प्राणायामाः॥ भक्षणे षट्॥ भोजनमेहनयोरप्येकमित्येके॥ सू
र्योदयस्वापिनो दिने भुंजानस्य दशाधिकसहस्रजपो गायत्र्याः॥ एवमस्त
स्वापिनो रात्र्युपोषितस्योत्तरदिवसे प्रागुक्तजपइत्यन्ये। स्थावरजंगमवृक्षव
ल्मीकपरशुसरीसृपादिप्राणिवधे कूष्मांडीभिर्होमः यज्ञोपवीतमेखलाजिन

५५

दंडानांलोपेव्याहृहोमंषट्प्राणायामान्कृत्वापुनर्धारयेत् ॥ संध्याग्निकार्यलोपे
स्नात्वाष्टसहस्रभिक्षाटनमकृत्वास्वस्थस्यैकान्नाशनेष्टसहस्रगायत्रीजपः ॥
भिक्षांयाचित्स्यैकान्नाशनेनदोषः ॥ शौचाचमनसंध्याभिक्षाग्निकार्यकौपीन
कटिसूत्रोपवीतमेखलाजिनलोपेशूद्रादिस्पर्शेछत्रपादुकामालोद्वर्तनानु
लेपनांजनजलक्रीडाघृतनस्यगीतवाद्याद्यभिरितिपांखंडादिसंभाषण
पर्युषितभोजनादिकरणेसकलदोषपरिहरार्थंतस्यकृच्छ्रत्रयंमहाव्याहृति
होमश्च ॥ वृद्धकालंबधृतधर्मलोपेतंवोधियेतिमंत्रस्यशिवालयेलक्ष
जपः ॥ गुरुशुश्रुषादिलोपेष्टशतजपः ॥ मधुमांसमद्यलशुनादिभक्ष
णेकृच्छ्रः ॥ मत्स्यापराकः ॥ अभ्यासेद्विगुणंपुनरुपनयनंचात्रततआरब्धव्र
तस्यसमापनंमद्यग्रहणंक्षत्रियादिविषयंएतदेवविधवार्यविमायाः ॥
तदेकनाव्यरोगार्थंगुरूच्छिष्टंकृत्वाभोक्तव्यं। ततोरोगनिवृत्तौहंसःशुचि
षदित्यादित्यमुपतिष्ठेत। अकामपीतमद्येनदोषइतिमिताक्षरा ॥ आज्ञा

विघाते गुरुरोः प्रतिकूलाचरणे च स्मा न स्तं प्रणिपातादिना प्रसाद्यापगतदुः
खकोपं च कृत्वा शुध्येत ॥ एतदुत्तानपूर्वसकृदल्यापराधो अन्यत्रापि तद्विषये च ब्र
ह्महसावदसंताभ्यासे अस्यय तिव्रतिनोश्च ॥ नव आब्दमासिकादौ भोजने
त्रिरात्रोपवासाधिकं तत्कृच्छ्रं त्रयस्त्रयः प्राणायामाः ॥ पंचमेघतमाशनं च ॥ अनाप
दि तु कापमेकउपवासः पंचगव्यपानं चाधिकं ॥ आभ्यासे तत्सकृच्छ्राद्द्विगुणं ॥ एत
देवस्तत्क्च्य त्वभोजनो स्तकिंजलपाने च पंचगव्यपानं तत्स्पर्शे स्नानं ॥ आमहे
मसंकल्पश्राद्धे तु तत्तदर्धम् ॥ शूद्रान्नभोजने ऐपेकः ॥ क्षत्रियोच्छिष्टाशने
स्नानमष्टशतगायत्रीजपो द्वादशादिनमुपवासश्च ॥ तद्भोजनानंतरं पाकपात्रे व
शिष्टं ॥ वैश्यशूद्रोच्छिष्टे किंचिदधिकं कल्प्यं ॥ चोरव्याघ्रादिभयाकुलदेशे म
हांधकारे रात्रौ गुरुणा स्वकार्यार्थं प्रेषितः शिष्यो दैवान्मृतश्चेत्तद्गुरोः
कृच्छ्रत्रयं सर्वत्रारोग्यार्थमौषधपथ्यान्नदाने तदर्थं यत्ने क्रियमाणे मृतो न क
श्चिद्दोषः ॥ इति व्रतलुप्तिः ॥ अथ मिथ्याभिशंसने ॥ यस्तु विप्रो विप्रं महापा
तकाद्यैरभिशंपेत अनेन ब्रह्महत्यादि गोहत्यादि वा कृतमिति संव्यवहर्तृस्य

ति मिथ्याकृयास्स तदा मासमंबुभक्षो नियतेंद्रियः शुद्धवती मंत्रजपशीलः
शुध्येत् ॥ इदन्तु पश्चातकाभिशापाभ्यासे महापातकस्य सकृदभिशापेच
घ क्षत्रियादीनामभिशापने विप्रस्यार्धोहानिः। परा क्षत्रियादयो विप्रमभिशपं
ति तद्दा तेषां द्विगुणचतुर्गुणं। शूद्रस्य जलोपस्थाने मंत्रक प्राणायामाः ॥ अतिपात
काभिशंसिनां पदेनां ॥ अनुपातकाभिशंसिनां ततो न्यूनं उपपातके ततो न्यूनं
मिथ्याभिशास्तस्य कृच्छ्रम्। वर्षपर्यंतमस्य प्रायश्चित्ताकारणे तु तदुत्तरमासम
सि भक्षता ॥ तत्र सार्धकृच्छ्रद्वयं ॥ मिथ्याभिशं[illegible] विप्रस्यां कनविवासनदंडादिशा
स्तो पंचवर्षं विप्रकुलेषु भैक्ष्यचरणं संवत्सरं वा ॥ षण्मासं चगवानुगमनं ॥ ॥
इति मिथ्याभिशंसनं ॥ अथापत्यविक्रये ॥ सच दास्यार्थम् ॥ एवमात्मभार्याविक्र
येपि। तत्रात्र कन्याविक्रये देवगृहप्रतिश्रयोद्यानारामपुष्करणीसभाप्रपापुण्य
सेतुविक्रये सुकृतविक्रये च चांद्रादि द्विवेकं ॥ अथ चात्रै मासिकम् ॥ आपदि तप्तकृ
च्छ्रः ॥ अत्यतापदि सांतपनं ॥ पुत्रविक्रये च द्विगुणं ॥ एकपुत्रस्यानापदि कामतः ॥

सुतविक्रयेचत्रिषवणस्नाप्यधःशायीचतुर्थकालाशीसंवत्सरेणशुध्येत्॥ईदृशंक
न्याविक्रयेतदर्धेनशुध्येत्॥आपद्यकामतःसुतविक्रयेतत्सकृच्छ्रं॥कामतोवाप्यने
कपुत्रस्यतद्विक्रयेतुचांद्रं॥आपद्येकपुत्रस्यकामतःपुत्रविक्रयेचांद्रद्वयं॥इतिसु
तविक्रयः॥धान्यपुष्पपशुस्तेयेस्तेयप्रकरणएवोक्तमपत्यपुष्पपशुस्तेयंतुमलि
नीकरणम्॥अथायाज्ययाजने॥तत्रव्रात्ययाजकोव्रात्योपनेताव्रात्याध्यापको
हीनयाजकःरस्थंस्रेष्टिकयाजकोवेदविप्लावीतस्करव्यतिरिक्तशरणागतत्यागी
तस्कररक्षकोवशीकरणोच्चाटनादिरूपाभिचारकर्तावामत्याकृच्छ्रातिकृच्छ्रत
प्तातिकृच्छ्रेषुयथायोग्यंकंचित्समुद्दितंकंचिदेकैकंकुर्यात्॥आततायिविषया
भिचारेनदोषः॥व्रात्यःप्रागुक्तः॥द्व्यहादिर्द्वादशाहांतोहर्गणोहीनः॥मत्याव्रा
त्यस्यउपनयनाध्यापनयाजनेषूद्दालकव्रतंमत्यासर्वेष्वेववाएतदुद्दालकव्रतं
चव्रात्यप्रकरणेउक्तं॥विप्राघंत्येष्टिकर्मसुलोभाद्याजनेकायोतिकृच्छ्रस्तत्सकृच्छ्रश्च॥
अभ्यासेद्विगुणं॥अत्यंताभ्यासेत्रिगुणं॥शूद्राद्ययाज्ययाजनेतत्पौरोहित्येतदध्याप
नेत्वमत्याचांद्रादिवेकं॥अभ्यासेद्विगुणं॥अशक्तौकृच्छ्रः॥मत्यात्रैमासिकं॥

आभ्यासे द्विगुणादि । कामतोऽसंतच्छूद्रयाजनाभ्यासे त्रीण्वर्षाहैमंतेषु क्रमेण पंच
तपोभ्रावकाशजलशायनानि । कुर्युर्गोमूत्रयावकाशनं चाकामतोभ्यासेतल्लुब्ध
सर्वद्रव्यत्यागेन द्वादशसहस्रप्राणायामाभ्यासेन शुध्यति ॥ परिवेदकादियाजनेप्येवं ।
सर्वत्र लब्धद्रव्यस्य जले त्यागपूर्वकमेवैतत्प्रायश्चित्तानुष्ठानं ॥ एवं पर्वचंडालादि
श्रोत्रावकाशाद्यनध्यायेष्वध्ययनं ॥ अशुचिनाध्ययनं प्रतिषिद्धाध्ययनं प्रतिषिद्धाध्या
पनं च वेदविप्लावनं तत्र मत्यात्रिरात्रमुपवासः ॥ अभ्यासे कृच्छ्रं ॥ असंताभ्यासे कृच्छ्र
त्रयं कामतोऽसंतानवच्छिन्नाभ्यासे संवत्सरं यवौदनभोजनम् ॥ एतदेव गर्हिताध्या
पकयाजकयोर्दक्षिणात्यागोधिकः ॥ स्मृतिधर्मशास्त्रव्याख्याने च तद्धर्मम् ॥ नित्या
नध्यायाध्ययने यावदधीतं तावज्जलेघमर्षणं तावत्स्वाध्याये जपेत् ॥ अशक्तौ
जले जपेत् ॥ अस्यशक्तः स्थले जपेत् ॥ मत्याप्यनध्यायमुपवासः ॥ अशुचिनाध्य
यने चैवं ॥ नैमित्तिकानध्यायाध्ययने च दुर्बोधस्य तदर्धं । काककुक्कुटमूषकमंडूका
[illegible]दैरंतरागमनेन तत्पुनरध्ययनाभावश्च ॥ गवाश्वमहिषादिपशुस्त्रीरस्याघं त

रागमनेत्रूपवासः ॥ मार्जारसर्पनकुलपंचनखजात्यादेरंतरागमनेभित्रिरात्रमु
पवासः । त्रिषवणंस्नानं भोजानुभ्यां ग्रामांतरगमनं वा । श्वखरकश्रगालवानररज
कादीनामंतरागमने कायांखखराहोष्ट्रादिचंडालसूतिकोदक्याशवादेरंत
रागमने कायत्र्यां गोरगवृषगजादिकृस्नो ।ऽस्वनास्तिकादीनामंतरागमने त्रै
मासिकं ॥ शाश्रमेषश्वपादिको गमने षाण्मासिकं ॥ गजगंडस्वारव्याघ्रमहा
पातकिकृतघ्नादिगमने कृच्छ्राण्युह्यं ॥ सर्वत्रामत्यार्धं । सर्वत्र तदानीमेवाध्यय
नं न विरामेण प्रायश्चित्तं मित्साद्रः ॥ इत्यपांक्त्ययाजनं ॥ अथ पितृमातृसुत
त्यागे ॥ अपतितानां पित्रादीनां गृहान्निष्काशनं हिंसः मत्या तत्कर्तुश्चांद्रायणा
दिष्वेकं त्रैमासिकं वा जातिशक्तिगुणाभ्यासाद्यपेक्षया ॥ मत्याभ्यासेधिकं ष
ष्ठान्नकालतासंहिताजपो वा तावत् । मातुस्त्वेतेरपितृदोषेस्त्याज्यते वा सर्वथा ।ऽ
रक्षणरूपभार्यासुतत्यागेप्येवमेवा तडागारामविक्रयेऽतंसुतविक्रयमसंगे ।
कन्यादूषणमेगुल्यादिना तस्याः क्षतयोनित्वकरणं मिथ्या तद्दोषस्थापनं च ॥

तत्रसवर्णानांचांद्रत्रैमासिकंवा । आनुलोम्येनासवर्णकन्यादूषणे मासंपयःपानं
कार्यंवा ॥ प्रातिलोम्येतुक्षत्रियवैश्ययोः कृच्छ्राब्दं ॥ ग्रीष्मवर्षाहेमंतेषुक्रमेणघ
र्मांभ्रावकाशजलशयनानि मासंगोमूत्रयार्केवपानां चैत्रादिचतुष्कं ग्रीष्मः ॥
एवमपरञ्चतुष्कं वर्षा हेमंते ॥ शूद्रस्यवधएवासोमविक्रयीवृषलीपतिकौमार
दारस्याग्निशूद्रयाजकगुरुरुप्रतिहंतृमद्यपब्राह्मणवृत्तिघ्नकृतघ्नकूटव्यवहारि
मित्रध्रुक्शरणागतघातिप्रतिरूपकवृत्तिषमस्यात्रैमासिकं । मत्याषाण्मासि
कं ॥ अभ्यासेकृच्छ्राब्दं ॥ परिवेदकयाजनेतस्मैकन्यादानेगुरौकौटिल्येआत्मार्थं
पाकाद्यारंभेमद्यपायाः स्वस्त्रियाअपिउपभोगरूपमद्यपस्त्रीनिषेवणेदेवताराः
धनाद्यर्थंगृहीतव्रतलोपेन्यस्मिन्व्रतलोपेचचांद्राद्विकंत्रैमासिकंवा ॥ ॥अथ
स्वाध्यायादित्यागे ॥ तत्राल्पंतापदिस्वल्पकालंवेदत्यागेकार्यं । अधिककालेति
कृच्छ्रांतलोप्यधिकेपराकइत्यादिवोध्यं ॥ इदमपिमासादर्वाक्तदुत्तरमपित्यागे
चांद्रत्रैमासिकादियथायथंकृतप्रायश्चित्तेनपुनर्नेचार्यादिद्व्यग्रहणंकार्यं ॥ ॥

पद्रत्तु धनार्जनव्यग्रतया शास्त्रश्रवणकुटुंबपालनाद्याकुलतया वाग्निरक्षोकालं त्यज
ति तदा चांद्रादिष्वेकं त्रैमासिकं वा ॥ नास्तिक्याध्यसनासत्त्वा वा तत्त्यागो ब्रह्महत्यासमः ॥
तथा नास्तिक्यस्यादग्नित्यागे मासद्वये जाते कायं कृत्वा पुनः संधानं मासचतुष्टये ति
कृच्छ्रस्तप्तकृच्छ्रं वा ॥ षण्मासत्यागे पराकः ॥ तदूर्ध्वं चांद्रादिष्वेकं ॥ संवत्सरादूर्ध्वं त्रै
मासिकं द्वैमासिकं वा ॥ यदा त्वालस्यात्त्यजति तदा द्वादशाहातिक्रमे त्र्यहउपवासः ॥
मासातिक्रमे द्वादश ॥ संवत्सरातिक्रमे मासोपवासो मासं पयो वा ॥ प्रमादादिना तत्त्या
गे आ त्रिरात्राद्द्वादश प्राणायामाः ॥ आ षड्रात्राच्चतुर्विंशतिः ॥ आ द्वादशरा
त्रात्संचाशत् ॥ आ विंशतिरात्राच्छतं प्राणायामाः ॥ आ त्रिंशद्रात्रादुपवासः ॥
आ षष्टिरात्रात्त्रिरात्रं ॥ आ संवत्सरात्कायम् ॥ अतः परं प्रसद्दकायम् ॥ सर्वत्र या
वत्कालमहोमी तावद्द्रव्यं दद्यादित्याहुः ॥ प्रमादविषये तु संवत्सरादूर्ध्वं तत्त्यागे चांद्रं
कृत्वा पुनराधानं द्विवर्षोच्छिन्ने चांद्रं सोमायनं च चांद्रत्रयं वा ॥ त्रिवर्षोच्छिन्ने संव
त्सरं कृच्छ्राभ्यासो गोदानं पुनराधानं वा संस्काराद्यकरणरूपे विभवे ससरक्षणरू

पेचसुतत्यागेणतिसादित्यागकारणाभावेपिपितृमातुलादिरूपेबांधावेस्तंभा
षणसहभोजनाभावादिरूपेशक्तौपालनाद्यकरणरूपेचबांधवत्यागेभार्यायावेश्या
त्वकरणेनजीवनरूपेस्त्रीधनोपजीवनरूपेचस्त्री।जीवेनेप्राणिवधेनजीवनरूपेहिं
साजीवनवश्याद्यर्थौषधिभिर्जीवनरूपेओषधीजीवनेनेजाबालेडिग्रादिविधानरू
पेतिलेक्ष्वादिपीडनयंत्रप्रवर्तनरूपेचहिंस्रयंत्रप्रवर्तनेतृणादिमहायंत्रप्रवर्तन
रूपेचतस्मिन्मृगयाद्युताद्यष्टादशव्यसनेषुचचांद्रादिष्वेकंत्रैमासिकंषा।।अत्यं
ताभ्यासेतुमृगयायांद्यूतेचवार्षिकव्रतां अनृतवक्तृतस्कर राजवक्तृचैत्यवृक्षारो
पणवृत्तिगरदाग्निदाश्वस्यगजारोहणवृत्तिरंगोपजीवि।श्वगणिकशूद्रोपाध्यायवृ
षलीपतिभांडिकश्ववृत्तिभस्मजीविक्षत्रोपजीविविभ्रिकिकसेवकदेवलकरजपुरोहि
तकृतघ्नमद्यपकूटकारकापत्यनरपशुविक्रेत्राद्यभोज्यान्नाशनेब्राह्मण्यमिच्छं
तस्तल्लघ्वद्वयंत्यक्त्वात्रैमासिकंकुर्युः।बहुकालेद्वयंत्यक्त्वाचतुर्थकालाहारा
स्त्रिकालस्नायिनोब्दंचरित्वादेवपितृतर्पणंकृत्वागवाह्निकंचदत्वाशुध्येयुः।।श्वा

गणिकः श्वगणजीजीवी भांडिकस्तूर्यादिजीवी बंदी वा। श्ववृत्तिः। सेवकः॥
ब्रह्मजीवी मूल्येन द्विजकर्मकर्ता द्रव्यग्रहणेन परदास्यकरणरूपे आत्मविक्रये शू
द्रसेवारूपे शूद्रप्रेष्यत्वे हीनेषु मैत्रीरूपे हीनसख्ये चांद्रादिष्वेकं। त्रैमासिकं वा॥
बहुकालं शूद्रसेवायां चतुर्थकालमितभोजना स्त्रिकालस्नायिनः स्थानासनाभ्यां
विहरंतस्त्रिभिर्वर्षैः शुध्येयुः॥ समुद्रयाने ब्राह्मण्न्यासहरणे सर्वपण्यैर्व्यवह
रणेऽभक्ष्यन्लेच्छशूद्रसेवावत्। अहीनसंख्यभेदयज्ञुपोष्य पयःपारणं॥ अवृ
त्तसवर्णाविवाहस्य हीनवर्णाविवाहो हीनयोनिनिषेवणं साधारणस्त्रीस्त्रीरू
पवेश्यादिभोगश्च। तत्राद्ये चांद्रादिष्वेकं त्रैमासिकं वा॥ सकृदमतिपूर्ववेश्यागम
ने प्राजापत्यं तथा द्वित्रिरभ्यासे कामतश्च सकृद्गमने सप्तरात्रं तप्तकृच्छ्रोदकपानं।
मतिपूर्वकाभ्यासे चांद्रं अत्यंताभ्यासे त्रैमासिकं॥ रेतःसेकास्त्राद्धि· वत्तौस्नै
लस्नानं॥ गोभ्य औषधिभारदानं च॥ आजन्मासंतानवाछिन्नाभ्यासे गुरुत
ल्पवत्॥ अत्र मतिनिमित्तं नैमित्तिकस्यावृत्तिर्नास्ति किंत्वेवं मत्यागमनाभ्यासे
हर्गुणावृद्धिर्मासादर्वाक्॥ ततो मासगुणावृद्धिर्यावदब्दं। ततोऽब्दगुणावृद्धिः।

६०

अमसाभ्यासेतुसकृत्कृतेयत्प्रोक्तंतत्त्रिभिर्दिनैस्त्रिगुणंमासात्संचतुर्गुणंष
ण्मासाद्दशगुणं।अब्दात्संचदशगुणंत्र्यब्दाद्विंशतिगुणंततोप्यूर्ध्वंप्रकल्प्यं॥
एवमुपपातकाभ्यासेनुक्तप्रकारविशेषेसर्वत्रमहापातकाभ्यासेतुसकृत्कृते
प्रथमेयत्प्रोक्तंतद्द्वितीयेद्विगुणंतृतीयेत्रिगुणंचतुर्थेनिष्कृतिनास्तीत्यादिकं॥
अगृहीताश्रमित्वमनाश्रमित्वं॥वर्षपर्यंतंविनाश्रममवस्थानेप्राजापत्यं
कृत्वाऽऽश्रमअंगीकारः।द्वितीयेतिकृच्छ्रं।तृतीयेकृच्छ्रातिकृच्छ्रं।अतऊर्ध्वं
चांद्रं।इदमापदि॥अनापदिप्रथमाब्देचांद्रादिषट्कं।यद्वात्रैमासिकं।ततोब्देषु
द्वित्रिचतुर्गुणंबोध्यं॥परपाकरतिःपरान्नपरिपुष्टताचार्वाकादिशास्त्राभ्या
सअसच्छास्त्राधिगमनंस्वर्णाद्युत्पत्तिस्थानेषुराजाज्ञयाधिकारित्वमाकराधि
कारस्तेषुभार्याविक्रयेचचांद्रादिषट्कंत्रैमासिकंवा॥ ॥अथासत्प्रतिग्रहे॥
तत्रप्रतिग्रहस्यासत्त्वंजातिदुष्टचंडालादेःकर्मदुष्टपतितादेश्चभवतिकुरुक्षे
त्रादिदेशेग्रहणादिकालेचस्वरूपतोपिसुरामद्यमेषीमहिषीकृष्णाजिनकाल

पुरुषमत्तशाय्योभयतोमुख्यादेरसत्वं। तत्र निमित्तद्वयसमावेशो यथापतितादेर्मेष्या
दिप्रतिग्रहः॥ तत्र ब्रह्मचर्यपूर्वं गोष्ठे वसतः प्रत्यहं सहस्रगायत्रीजपपूर्वकं मासंप
योव्रतं। अभ्यासे षष्ठकाले पयःपानं मासं यावत्॥ त्रिचतुर्भिर्निमित्तसन्निपातेन्चुप
दैकमेव निमित्तं तदा चांद्रं॥ पवित्रैरिष्टिभिर्मृगारेष्टिमित्रविंदेष्टिर्गायत्र्यालक्षजपो
वा॥ अंते विप्रभोजनं सर्वत्र। सर्वत्रानुक्तौ दातृदेशकालद्रव्येष्वन्यतरदोषे प्राय
श्चित्तदुष्टेषु द्वादशनिष्कप्रमाणद्रव्यप्रतिग्रहे कार्यं। एवं सर्वत्र द्रव्यानुसारात्प्रा
यश्चित्तवृद्धिह्रासौ। दातृदेशकालद्रव्येष्वन्यतरदोषे प्रायश्चित्तस्यैकैकगुणा
दिवृद्धिः॥ अल्पद्रव्याणामणिवासोगवादीनामेकैकप्रतिग्रहे गायत्र्यष्टसहस्र
जपः॥ ततोल्पेयं। भिक्षामात्रप्रतिग्रहे पुण्यमंत्रमुच्चारयेत्॥ प्रायश्चित्तं सर्वस
तिद्रव्यगृहीतद्व्ययसागोत्तरं॥ त्यागश्चाप्सुप्रक्षेपो कस्यचिद्दानं वा॥ एकतरनि
मित्तके तु त्यागप्रायश्चित्तयोर्विकल्प इत्याहुः॥ षोडश महादानान्यप्रतिग्रह
एकस्यैव। अनेकैः प्रतिग्रहे तु न दोषः॥ शास्त्रविषप्रस्लांउश्वशालग्रामगजति

ललोहानां मृतशय्यालंकारवस्त्रादीनां तिलधेन्वाश्च प्रतिग्राहो सन् ॥ नवश्राद्ध
मासिकश्राद्धगजच्छायासु भोजनं च ॥ तथा तीर्थे प्रतिग्रहोऽविघातयो हीनेन प्र
तिग्रहोऽपि तथा ॥ उत्तमद्रव्यप्रतिग्रहश्च ॥ उत्तमत्वं मूल्यतो वचनाच्च ॥ तत्र देववि
प्रराज्ञां द्रव्यमुत्तमं ॥ गोभूसरस्वत्यस्तथा तिष्ठं दोग्ये ॥ अन्नं दधि मधु त्राण गो
भूमिरुक्माश्व गजा उत्तमा इति देवलः ॥ रत्नक्षेत्रवेश्महेमकुप्याभरणानि च
मृतशय्यादिप्रतिग्रहे पुनः संस्कारोऽप्यधिकः ॥ एवं समुत्कर्षेऽनृते गुरोरलीक
निर्बंधे गुरोर्व्यभिचाराद्यभिशस्तौ शापे च ज्ञानतः कृते मासं पयसा वर्तनं ॥ एतदे
वाशुचिद्रव्यस्याग्न्यंभसोस्स्पागेरसाहुः ॥ अथ निंदितान्नादने ॥ तत्रान्नमद
नीयमानत्वं तस्य निंदितत्वं स्वभावकालसंपर्कक्रियाभावपरिग्रहैः ॥ स्वभावा
ल्लशुनादेः ॥ कालतः पर्युषितादेः ॥ संपर्कात् श्वस्पृष्टादेः ॥ क्रियातो हस्तदाना
दिना व्यंजनादेः ॥ भावाद्दुष्फुरसादेः ॥ भवति कस्यचिद्दुष्टरसे मदिरेयमिति भावः ॥
परिग्रहात् पतितान्नादेः ॥ तत्र स्वभावदुष्टलशुनगृंजनछत्राकविड्वराहग्राम

कुक्कुटपलांडुनां प्रत्येकममत्यासकृद्भक्षये सांतपनं ॥ अभ्यासे यतिचांद्रा
यणं ॥ अभ्यासे मत्यासकृच्चेत्त्रंचांद्रं ॥ अभ्यासे तद्यावृत्तिः ॥ अभ्यस्तं ताभ्यासे
सुरापानसमं ॥ प्रायश्चित्तांते पुनरुपनयनमेषु सर्वत्र पुनरुपनयने च न स्वा
ध्यायादिकालापेक्षावपनमेखलादंडभैक्षचर्यादि च न ॥ अत्र गृंजनं विष
दिग्धबाणहतमृगमांसमिति कश्चित् ॥ कलंजमिति तन्नामेति प्राच्याः ॥
गृंजनं लशुनतुल्यः ॥ कंद इति मिताक्षरा ॥ गाजराख्यं मूलं पदीयं पत्रं गाय
काः कंठशुध्यर्थं भक्षयंति विटाश्च मदार्थं सपत्र विशेषश्चेति माधवः ॥ चरका
द्युक्तपलांडुवांतरभेदेषु छत्राकादिभेदे वकादौ नरगोमांसादौ चैवं ॥ एषां सु
खप्रवेशमात्रे बलात्कारेण भक्षणे ऽनुपनीतबालेन सकृद्भक्षणे च गायत्र्या
अष्टाधिकसहस्रेण मूर्ध्नि संपातावतैनयउपवासश्चेति स्मृत्यर्थसारे सर्वत्र
छत्राकादेस्तेर्धर्मम् ॥ गंधवर्णरसैर्लशुनादितुल्यभक्षणे चालद्वाख्यपक्षकंटकि
कुसुंभवर्तीककुंभीकशिग्रुतालश्लेष्मातककवककृष्णसार्षपतंडुलीय
कनालिकानालिकेरिखद्वाख्यशाककलिंदलाककुंभीशाकवत्तालाबुआ ६२

रण्यकंदरककुसुंभरक्तशिग्रुकोविदारश्लेष्मातकंटकिवृंताकराजसर्षपाख्यशा
कोदुंबरज्योतिकाकेसरखट्वाक्षक्षवकशाणपुष्पशाल्मलेषु अन्येषु च कटुदुर्गंधिकंद
मूलफलादिषु भक्ष्याभक्ष्यत्वेन संदिग्धेषु चैतेषु व्रश्चनप्रभवेषु लोहितवृक्ष
निर्यासादिषु रेतोविण्मूत्रेषु करंजमेथितेदग्धिबर्हिर्वेदिचरुपुरोडाशेषु भक्षि
तेषु अमत्या सकृच्चेदुपवासः॥ आवृत्तिरभ्यासे। कामतोभ्यासे प्राजापत्यं॥
असंताभ्यासे तत्सकृच्छ्रः पुनरुपनयनं च॥ अन्यथा पतेत्॥ संधिनीयमसूस्यं
दिन्यनिर्दशगामेध्यसेविमृतवत्सान्यवत्सागवामनिर्दशाजामहिष्योरेकश
फानां महिषीवर्जितारण्यमृगाणां चाजाविवर्जितसर्वद्विस्तनीनां च क्षीरपाने द
धितक्रभववर्जितसर्वशुक्तेषु चामत्यापानोत्तरं समनंतरमेव छर्दने चैक उपवा
सः। मत्या त्रिरात्रं। अमत्या। सकृद्भक्षणे च। ज्ञानतो भक्षणे छर्दने द्व्यभ्यासे
पक्षं गोमूत्रयावकपानं। असंताभ्यासे मासं ततं। संधिनी वृषेणोपभुक्ता गभि
षुः॥ स्यंदिनी स्रवत्क्षीरा एडऔविकखरोष्ट्रनरवानरगवेद्राहुश्वापदक्षीरेषुम

सासांतपनंमस्यातस्यकृछ्रः॥अभ्यासेचांद्रंपुनरुपनयनंच॥अभ्यासेनपत
नः॥स्त्रियाःक्षीरंद्विजः॥पीत्वाकथंचित्कामतोहितःपुनस्संस्कृत्यचात्मानं
प्राजापत्येनशुध्यति॥ब्रह्मचारियत्योःकृछ्रःतप्तकृछ्रोवा॥शुक्तेषुदधि
सविकारंभोज्यं॥शूद्रस्यकपिलाक्षीरपानेनवाब्दंब्रह्महव्रतं॥विप्रस्याप्युद्धृ
तशेषातिरिक्ततत्यानेपशुत्वमासि॥सर्पसरीसृपमूषकमार्जारवृककला
सकर्कटनकुलगंडकशृंगिमयूरऋक्षव्याद्रवानरकपिश्वगोमायुवृकदंष्ट्रिपंच
नखसिंहव्याघ्रादिश्वापदः॥क्रव्यादजंतुगजाश्वोष्ट्रखरैरेकशफानामुभयतो
दतांकाकवकबलाकीहंसगृध्रजालपादचक्रवाकविष्किरपुंडरीककपिंजल
भासचाषकुक्कुटहंसप्लवचक्रकारंडवगृहचटककपोतपारावतखंजनपांडू
कशुकसारिकासारसटिट्टिभोलूकश्येनकंकरक्तपाददितित्तिरिकोकिलहा
रीतसहालिकुटचालमहुकलविंकक्रौंचखंजरीटदार्वाघाटभुलिंगवागु
हादीनांजलचरजलजपक्षिमत्स्यधघप्राणिभक्षकनखैर्विकीर्यान्नादिभ

क्षिकमत्स्याद्दजंतुमत्स्यानांमासस्यस्तूनामासशल्कमांसानांशशशल्लकच्छ
पगोधाखड्गवर्तिरिक्तपंचनखमांसानांतेषांविण्मूत्रशुक्ररक्तवसामज्जा
नांतदुच्छिष्टानांचभक्षणेऽमत्याकायांअभ्यासेमहासांतपनांमत्यातपृच्छ
च्छ्रोभ्यासेचांद्रं॥अत्यंताभ्यासेपलनांतेषांकर्णविट्प्रभृतिमलषट्कंधरेतिस्म
त्यर्थसारे।अमत्यासकृद्भक्षणेउपवासएकः।कामतोद्विगुणं।तथाभ्यासेत्रि
रात्रसप्तरात्रदशरात्रमासव्रतचांद्रायणान्यभ्यासाधिक्यमालोच्ययोज्या
नि।अभ्यासव्रतांतेसर्वत्रैकद्विनंघतप्ताशनंपुनःसंस्कारश्चाभ्यासमुदितभ
क्षणाभ्यासेतुषाण्मासिकंसंवत्सरंचेतिप्राच्याः।एषांज्ञानतोभक्षणोद्गारणेतु
सांतपनमज्ञानतःप्राजापत्यं।अकामतोभ्यासेचांद्रं॥कामतस्तथात्वेषाण्मा
समत्यंताभ्यासेसांवत्सरमितिमिताक्षरायांएवंकेशनखप्राशनेऽज्ञाद्विमुहि
ममां षमृगाणांमांसभक्षणेमत्स्कोष्टभक्षणेऽमत्याएकउपवासः।मत्यात्रिरात्रं॥
एवंकीटपतंगकृमिजलचरास्थिभक्षणेरक्तवमनेचेतगेहितिस्मृत्यर्थसारे।

मांसभांउपक्वान्नाशनेत्र्यहंकुशापक्कपयःपानं।व्रतिनः केशादेर्मुखमात्रप्रवेशेतत्स
घृतंवाक्षीरसंवापिबेत्॥ केशादिमिश्राशनेसघृःकुशाहिरण्योदकसहितघृतपानं
ज्ञानतोभ्यासेत्रिरात्रोपवासोघृतप्राशनंच॥ भक्ष्याणिचशशकादयःपंचैव
पंचनखाः।मत्स्येषुसिंहतुंडकरोहितपाठीनराजीवाःसशल्काश्च।सर्वमहि
षाजाखुरभरुरुमृगाश्चतित्तिरिमयूरलावककपिंजलवार्ध्रीणसवर्तिकाः
पक्षिविस्राहुः॥ ब्रह्मचार्यादेर्मधुमांसादिभक्षणेधिकंत्रिरात्रंकार्यम्॥ कार्यं
वापुनरुपनयेतांततोव्रतसमापनं।अज्ञानतस्सकृद्गोमांसभक्षणेकार्यं।ज्ञानं
ज्ञानतोद्विगुणं।अज्ञानतोभ्यासेचांद्रं।समुद्रतीरेनदुत्सहितांगोश्चदक्षिणा॥
ज्ञानतोभ्यासेसंवत्सरव्रतं।अत्यंताभ्यासेपातित्यं।कपिखरविड्वराहाणांरेतो
मूत्रपुरीषाणामन्येषांचाभोज्यानामेतद्भक्षणेचांद्रं।अज्ञानतस्तप्तकृच्छ्रं॥
अंतेउपनयनंसर्वत्र।वल्लौरेतोमूत्रादिपानेप्राजापत्यं।पुनैकादशावर्षस्या
प्येतदेवेत्याहुः॥ अथोच्छिष्टाभक्ष्यभक्षणे॥ तत्रश्वकाकपक्षिश्वापदाखु

विडालनकुलोच्छिष्टेभपस्पन्नेरसेचकेशाद्युपभ्राऽद्रोण्यादौद्रव्यशुद्धिसंस्का
ररहितेमत्यांसाजग्धेएकाहंब्राह्मीसुवर्चलपानम्॥मत्याचेत्त्रिरात्रं।अस्या
स्मृत्येचेदं।मत्याभ्यासेकृच्छ्रः॥मत्याभ्यारोपस्तंयावकव्रतं।व्रतस्थब्रह्मक्ष
त्रवैश्येषुशूद्रोच्छिष्टेतुविप्रएकत्रिपंचसप्तरात्राणिपंचगव्यंपिबेत्॥अभ्यासेप्ये
षामावृत्तिः।मत्यातान्येवसोपवासानिकुर्यात्॥मत्याभ्यासेकृच्छ्रातिकृच्छ्र
तत्सकृच्छ्रचांद्रायणि।क्षत्रादौपादपादहानिः॥विप्रोच्छिष्टभोजनेसकृत्स्ना
नतःकृतेमहाव्याहृत्यभिमंत्रितपयःपानं॥स्नानस्तदभ्यासेसांतपनं॥
उच्छिष्टंचात्रैकपंक्त्युपविष्टविप्राणांभोजनेएकेनापियात्रत्यागेशेषमन्न
मुच्छिष्टं।एवंविधशूद्रोच्छिष्टभोजनेत्रिरात्रमघमर्षणजपः।कामतस्त्वे
तद्विषयेपंचरात्रंसप्तरात्रंवाऽभोजनंचांद्रवाभ्यासादितारतम्येनयोज्या
गुरुभिन्नोच्छिष्टस्त्रीस्वोच्छिष्टोच्छिष्टोपहितभोजनेकृच्छ्रं।भोजनपात्रे
भुक्तशेषमन्नोच्छिष्टं।शूद्रैर्भुक्तशेषभोजनेऽकामतस्तत्सकृच्छ्रंकामतः।
श्च

प्राजापत्यं अभ्यासेपराकः ॥ क्षत्रवैश्यगर्भादिभुक्तशेषभोजनेपादोनकृच्छ्रसार्धकृ
च्छ्रकृच्छ्रत्रयाणीतिकेचित् ।भांडस्थेकेशपिपीलीकामेध्यमलकीटैरुपहतेतावन्मा
त्रमुत्सृज्यस्वस्मभस्मताम्रवैडुर्यहिरण्यरजतादिभिर्गोवालदर्भयुक्तेनवारिणा
शेषंप्रोक्षयेत् ॥ हस्तस्थमेवंभूतंत्यजेत् ॥ मुखस्थंनिष्ठीव्यघृतंप्राशयेत् ॥ मनु
ष्यरेतो ।विण्मूत्रभक्षणेवर्णाः क्रमेणतप्तकृच्छ्रकायत्रिरात्राणिकुर्युः मत्याचां
द्रतप्तकृच्छ्रातिकृच्छ्रकाया ।पुनःसंस्कारश्च ।अंत्यानांभुक्तशेषंपावकपात्राव
शिष्टंभुक्त्वावर्णाश्चांद्रकायंतदर्धंपादंचकुर्युः ।अंत्यानामुच्छिष्टभक्षणेचांद्रम
हासांतपनषड्रात्रत्रिरात्राणि ।अभ्यासेद्विगुणं ।अत्यभ्यासेत्रिगुणं ।निरंतरेपतनं
आमहेत्वर्धम् ॥ तदुच्छिष्टभोजनेद्विगुणं ॥ सहभोजनेत्रिगुणं ।मत्याभ्यासेप
तनंकेचिदुच्छिष्टभक्षणप्रायश्चित्तानिप्रकीर्णकप्रसंगेदर्शितानि ॥ ॥
अथाशुचिद्रव्यस्पृष्टभक्षणे ॥ तत्रकेशकीटनीलीलाक्षास्नाय्वस्थिचर्मरुधिर
विण्मूत्रमांसवसामज्जाशुक्रस्पृष्टस्यमहापातक्यवेक्षितस्यदुष्टभक्षेषुव
लीढस्यविड्वराहश्वाद्युच्छिष्टस्यगवाघ्रातस्यशुक्तपर्युषितयोः तथापक्व

दैवपित्र्यान्नहविषां चाशने पाने वा मसान्ते दुपवासः॥ मसा कृच्छ्रपादो ल्पसंसर्गे।
अधिकसंसर्गे र्धकृच्छ्रः॥ तत्रापि संस्पृष्टा मेध्यादि रसोपलब्धौ तप्तकृच्छ्रः॥ अ
विज्ञातजात्यस्थ्यादिदूषिते कर्णविडादिमलाषद्के चार्धम्॥ जलपानसमये मु
खनिःसृतं तोयं यदि भाजने पतेमा तदा तद्भाजनान्नभोजने चान्द्रम्॥ देईमसं
घ ताभ्यासे स्नानतः। सुराभिन्नगौडीमाध्वीमध्वैवास्ति तु शुक्तभांडोदकस्यापि ज्ञा
नतः सकृत्पाने छर्दने च त्र्यहं कुशमूलविपक्षीरपानं तथाभ्यासे तु देवषड्रात्रं
स्नानतस्तत्कपंचात्र्यहं शंखपुष्पीशृतपयःपानं तथाभ्यासे सप्तरात्रं गोमूत्रयाव
श्र कपानं। अत्यंताभ्यासे तु द्वादशाहं ब्राह्मीशृतपयःपानं प्रत्यहमष्टसहस्रगा
यत्रीजपश्चा अछर्दने नजीर्णत्वे त्वेतद्देवतव्रतत्रद्विगुणं॥ एवं भांडस्यार्द्रत्वे
पि॥ तालादिमद्यभांडोदकपाने एतदर्धं॥ शुक्तसुराभांडस्थोदकपाने छर्द
ने च एकउपवासः। परेन्हि च घृतप्राशनमात्रं। तादृशभांडस्थपर्युषितजलपा
ने छर्दने च त्र्यहं शंखपुष्पीपक्वक्षीरपानं तपस्त्वादेस्तत्तोकमेवा॥ अकाम
तोद्विव्याभ्यासे पंचरात्रम्॥ तत्कामतः सकृत्पाने सप्तरात्रं। तथाभ्यासे प

क्षांजीर्णत्वे भांडस्याईत्वे च प्राग्वत् ॥ आर्द्रसुराभांडस्योदके पीते जीर्णे च चांद्रं का
मतः । अकामतः षडुपवासाः । अभोज्यीयभांडस्थितजलदुग्धदधिपाने ब्रह्म
कूर्चः । शूद्रस्यात्र सर्वत्र विषये किंचिद्दानमेव ॥ अंतस्थितक्लिन्नमतपंचनख
श्वखरविड्वराहादियुक्तानीत्यंतोपहतकूपादिजलपाने षडुपवासाः कृच्छ्रा
वाप्तौ ते पंचगव्याशनेन्या अक्लिन्ने त्र्युपवासे त्रयं पंचगव्यं चांते शूद्राणां नक्त
म् ॥ इदं चाज्ञानतोभ्यासे सकृत्तु क्लिन्नेपि त्रिरात्रं अकामतो धंग्रान्यास्त्वकाम
तः प्रागुक्तं कामतौ लोहिद्विगुणमित्याहुः ॥ ताद्दग्मनुष्यशवयुक्तकूपादिज
लपाने त्वज्ञानतः सकृच्चेत् षडुपवासाः । कामतो द्विगुणमित्याहुः ॥ अभ्यासे
पराकः । अत्यंताभ्यासे सकृच्छ्रं । ततोधिकतराभ्यासे चांद्रं ॥ ताद्दशास्थलं
लतडागादिजलपानेतु न्यूनं कल्प्यं । विण्मूत्रास्थ्यादिदूषितकूपादिजल
पाने त्र्यहउपवासाः ॥ ताद्दक्कुंभस्थजलपाने सांतपनं । इदमज्ञानतः । कामतो
द्विगुणं । पूर्वोक्तकूपादेः पानव्यतिरेकेण स्नानमात्रे त्वेकउपवासस्त्रिषवण
स्नानं गायत्रीजपश्चांडालादिखाततडागादिषु जानुदघ्नादल्पपरि

माणजलासुहृद्पुष्करिणीषु अकामतो जलपाने नक्तं ॥ कामत एकउपवासः ॥ अन्त्यखानितचंडालादिपरिगृहीतकूपादिजलपाने एतदर्धं अभ्यासे कृच्छ्रं ॥ कामतोभ्यासे द्विगुणं ॥ जानुदघ्नहृद्पुष्कारिण्यादिषु न दोषः ॥ तादकूपे विप्रस्य महासांतपनं ॥ क्षत्रियादीनां कृच्छ्रकृच्छ्रार्धपादाः ॥ अमत्याधीं अशक्तः पंचगव्यं पिबेत् ॥ एतदेवाल्पजलतदीयतडागादौ पाने चांडालादिभांडस्थजलपाने च कूपवत् ॥ सकृद्दत्तानतश्चेत्त्र्यहउपवासाः ॥ आपदित्वेकोवात कूपभांडादिजलस्य पानोत्तरमेव च्छर्दने विप्रस्य कृच्छ्रं रजकाद्यंसजखात कूपभांडस्थांबुपयोदधिपाने त्वमत्याद्विजाः सब्रह्मकूर्चं त्रिद्व्येकोपवासान्कुर्युः ॥ शूद्रस्तुपैडेवासं शक्त्यादानं चामत्याद्विगुणं । अंत्यजैःखातवापीतडागादिष्वल्पजलेषुस्नानाद्याचरणे एकउपवासः ॥ मत्याद्विगुणं । मत्याभ्यासे कायां । मध्यमेषु पंचगव्यं । जानुदघ्नेषु न दोषः । अत्र सर्वत्र पुनः संस्कारः ॥ शूद्रामेध्यसेविकीटस्पृष्टभोजने त्वहोरात्रमभोजनं ॥ अथ चंडालाद्यन्नभक्षणे ॥ तत्र

ज्ञानतस्सकृच्चंडालाद्यन्नभक्षणे चांद्रं । अज्ञानतस्तत्सकृच्छ्रं ॥ एककालोद्दिष्टेनै
कस्य यत्नोपक्रमाणां यानामेकस्मिन्प्रयोगे भोजनं सकृद्भोजनं ॥ एवं पुनर्भोजने
भ्यासः । वारत्रयेऽस्यंताभ्यासः ॥ एवं सर्वत्र बोध्यमिति भाष्याः । भवदेवस्तु ज्ञानत
स्सकृद्भोजने सततप्रकृच्छ्रं चांद्रायणं ज्ञानतो द्वैगुण्यमित्याह । बलात्सकृच्छुष्कल
द्दन्नभोजने उपवासत्रयं बलात्सिद्धान्नभोजने पराकः । सिद्धान्नं शुष्कान्नं सक्तु
जलादौ तद्दुग्धमामान्नं बोध्यं ॥ एतत्पापस्योपपालकत्वेन तंत्रलाया अभावाज्ज्ञा
नाभ्यासे चांद्राभ्यासः । अज्ञानतस्तत्सकृच्छ्राभ्यासः । तेन ज्ञानतश्चतुर्वारं भोज
नेपातित्यं अज्ञानतो द्विगुणे तत्र चबाद्दशवार्षिकं ॥ यवनम्लेच्छयावनानामम
प्यन्नभोजनेऽप्येवं । द्विजस्य ज्ञानात्स्वेच्छया तेषां दासत्वांगीकरे तु प्राजापत्यद्वयं
तेन पापनाशोऽपि वचनान्नव्यवहार्यः । पुंश्चल्यभिशस्तम्लेच्छचांडालादीनां
बलादेकमासं दासत्वमापन्नो द्विजः कृतगोवधोच्छिष्टमार्जनोच्छिष्टभो
जनतत्स्त्रीसंगादिः प्राजापत्येन शुध्यति ॥ आहिताग्नेश्चांद्रं । संवत्सरोषिते प्रा

६०

जापत्यंपराकश्चाशूद्रस्यपक्षंयावकपानसंवत्सरवासे।। मासमात्रोषितेकृच्छ्रपादः।।
एवंवर्षत्रयपर्यंतप्रायश्चित्तकल्पनाकार्या।। एतदेवज्ञानाच्छूद्रादिदासत्वांगीकारे।
ज्ञानार्धमित्याहुः।। चंडालादिस्पृष्टान्नभोजनेप्राजापत्यं।। ज्ञानतोद्विगुणं। एतदेव
पतितकुणपरजस्वलादिस्पृष्टान्नभोजने। अज्ञानतः सकृत्तदुच्छिष्टान्नभोजने
चांद्रं।। तद्भोजनानंतरंपाकपात्रेवशिष्टं तदुच्छिष्टं। ज्ञानतोद्विगुणं। क्षत्रविशोरपु
दिबलात्कारेन्येतरतो वा लघूच्छिष्टभोजने चक्रमेण कार्यं तदर्धं। विप्रस्यतु तत्रा
पिचांद्रमेवा।। तयोरप्यापद्भावेन्नसूपोच्छिष्टभोजने च तदेव।। सर्वत्रानुच्छिष्टा
दुच्छिष्टे तदीये द्वैगुण्यं। तत्संसर्पन्नस्यपक्वस्यभोजने कृच्छ्रार्धम्।। चंडालस्पृष्टांबु
क्षीरदध्यादिपाने लघुसांतपनमज्ञानतः। तत्सीतशेषांबुपाने षडुपवासपूर्वकं पंचगव्य
पानमज्ञानतः।। अभ्यासेआवृत्तिः। अज्ञानतः सकृच्चांडिकाद्यन्नभोजने मासं गो
मूत्रयावकपानं शुष्कान्ने तदर्धं षडुपवासा वा।। आमान्ने तदर्धं। ज्ञानतो द्वैगुण्यं। अभ्या
